# संस्कृतवाङ्मयस्थसमासप्रयोगस्यैतिहासिकं सर्वेक्षणम्

**हरिलालपौडेलः**

*उपप्राध्यापकः, विश्वविद्यालयविद्यापीठम्*

hlpsharma2035@gmail.com

**शोधलेखसारः**

*अनुसन्धानात्मकलेखोऽयं संस्कृतवाङ्मयस्थसमासप्रयोगस्यैतिहासिकसर्वेक्षणे केन्द्रितोऽस्ति । व्याकरणशास्त्र-प्रचलितासु विविधासु शब्दव्युत्पत्तिप्रक्रियासु समासप्रक्रियाऽप्यन्यतमाऽस्ति। समासो हि संस्कृतभाषाया महत्त्वपूर्णवैशिष्ट्यरूपेण परिचीयते । समासो नाम संक्षेपीकरणम् । संस्कृतवाङ्मये कदा प्रभृति समासप्रक्रियाव्युत्पन्नानां समस्तशब्दानां प्रयोगः प्रारब्ध ? संस्कृतवाङ्मयेतिहासे समस्तशब्दप्रयोगस्यावस्था कीदृश्यस्ति ? इत्येतादृशानां समस्यामूलकप्रश्नानां समाधानान्वेषणायात्र समस्तशब्दप्रयोगस्यैतिहासिकं सर्वेक्षणं विहितम् । तदर्थञ्च गुणात्मकस्वरूपेऽस्मिन्ननुसन्धाने संस्कृतवाङ्मयान्तर्गतयोर्वैदिक-लौकिकवाङ्मययोस्तदन्तर्गतप्रमुखग्रन्थानाञ्च स्थालीपुलाक-न्यायेन सर्वेक्षणं कृत्वा विविधग्रन्थेभ्यः तथ्यरूपाः सामग्रीः सङ्कलय्य तासां वर्णनं, विश्लेषणञ्च कृत्वा निष्कर्षः स्थापितोऽस्ति । अतोऽस्मिन् मूलतो सर्वेक्षणात्मकः, वर्णनात्मको विश्लेषणात्मकश्चाध्ययनविधिरवलम्बितोऽस्ति । अत्र च मूलतः पाणिनीयव्याकरणस्य समाससम्बद्धसिद्धान्तः सैद्धान्तिकपर्याधारत्वेन गृहीतोऽस्ति । प्राप्ततथ्यानां विश्लेषणेन चात्र–*

संस्कृतवाङ्मये प्रारम्भकालादेव समासप्रक्रिया प्रचलिताऽऽसीत्, ऋगादिवेदसंहिताग्रन्थेषु, ब्राह्मणग्रन्थेषु च सरलप्रकृतिकलघुसमासः प्रयुक्तः, उपनिषत्स्वारण्यकेषु च तत्प्रयोगः क्रमशो वर्धितः, वाल्मीकीयरामायणे, विष्णुपुराणे, श्रीमद्भागवते च लेखकैः सौन्दर्यमयानां चामत्कारिकाणाञ्च समस्तपदानां प्रयोगः कृतः । सूत्रवाङ्मयेऽपि समासः प्रयुक्तः, किन्तु तत्र पाणिनीयसूत्राणि गौतमीयसूत्राणि चाग्रस्थानं लभन्ते । वृत्ति-भाष्यग्रन्थेषु मध्ये श्रीशंकराचार्यविरचितब्रह्मसूत्रभाष्यं, श्रीरामानुजाचार्य-विरचितश्रीभाष्य-गीताभाष्ये च समस्तपदप्रयोगदृष्ट्या महत्त्वपूर्णानि सन्ति । तत्रापि श्रीरामानुजाचार्यकृतगीताभाष्यं समासदृष्ट्या विशिष्टमस्ति । संस्कृतवाङ्मयस्य साहित्यिकरचनासु यथोत्तरं दीर्घसमासप्रयोगाधिक्यं दृश्यते । तत्रापि बाण-दण्डिनोर्गद्यसाहित्ये त्वतिदीर्घसमासप्रयोगः प्राप्यते । संस्कृतवाङ्मये ऋग्वेदकालादेव प्रचलिता समासप्रक्रिया यथोत्तरं विदुषां विद्वत्ताप्रकाशिकात्वेन, भाषिककौशलप्रदर्शनसाधनत्वेन, भावगाम्भीर्यप्रतिपादिकात्वेन च बहुप्रयोग-विषयताङ्गता प्राप्यते, समासप्रयोगदृष्ट्या संस्कृतवाङ्मयं समृद्धतमं दृश्यते, समासश्च संस्कृतवाङ्मयस्यासाधारणं मौलिकञ्च वैशिष्ट्यमस्तीति निष्कर्षः स्थापितोऽस्ति ।

**शब्दकुञ्जी**

समासः, संस्कृतवाङ्मयम्, समस्तपदप्रयोगः, स्थालीपुलाकन्यायेन, सर्वेक्षणम् ।

## १. विषयपरिचयः

शब्दसाधुत्वान्वाख्यायके व्याकरणशास्त्रे मुख्यतया कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाणीति पञ्चभिर्वृत्तिभिर्नूतनशब्दव्युत्पादनं क्रियते । तत्रैका समासवृत्तिः । शब्दनिर्माणप्रक्रियायां समासस्य महत्त्वपूर्णं स्थानं भवति । समासो नाम समर्थपदयोः तथाविधपदानां वा सार्थकरूपेणैकपदीकरणम् । अल्पशब्दैर्बहुगम्भीरभावप्रकाशनाय परिष्कृतभाषाप्रयोगाय च समासस्य प्रयोगो भवति । समासः खलु संस्कृतवाङ्मयस्य महत्त्वपूर्णवैशिष्ट्यरूपेण ज्ञायते । अतः समासप्रयोगस्येतिहासः कीदृशोऽस्तीति विषये ज्ञातव्यं भवति, किन्त्वद्यावधि एतद्विषये केनाप्यनुसन्धानात्मकलेखः प्रकाशितो न दृष्टः । अत एवैतद्विषये सर्वेक्षणमूलकमनुसन्धानकार्यमिदं प्रारब्धमस्ति । संस्कृतवाङ्मयेतिहासे समस्तशब्दप्रयोगस्यावस्था कीदृश्यस्ति ? इति मूलभूतां समस्यामादायैवानुसन्धानमिदं प्रवर्तते, तत्समाधाने च केन्द्रितमस्ति । तत्र च संस्कृतवाङ्मये कदा प्रभृति समासः प्रयोगे समागतः ? संस्कृतवाङ्मयेतिहासे वैदिकवाङ्मये लौकिकवाङ्मये च समस्तपदप्रयोगावस्था कीदृश्यस्ति ? विशेषतः केषु केषु ग्रन्थेषु समासस्याधिकः प्रयोगः प्राप्यते ? इत्येतादृशीनां शोधसमस्यानां समाधानान्वेषणे केन्द्रितोऽयमनुसन्धानात्मकलेखः । अत्रोत्थापितानां समस्यानां समाधानाय केनाप्येतादृशः प्रयत्नः कृतो न दृष्टिपथमागतः , यद्यप्येतद्विषयसम्बद्धानि कानिचन शोधकार्याणि जातानि दृश्यन्ते । शोध्यविषयेण, सम्बद्धसमस्याभिश्च प्रत्यक्षाप्रत्यक्षरूपेण सम्बद्धानि कानिचन पूर्वकार्याण्यत्र चर्च्यन्ते –

शशि बाला शर्मा इत्यनयाऽनुसन्धात्र्या **भट्टिट्ट-काव्य का व्याकरण के संदर्भ मे एक आलोचनात्मक एवं भाषिक-अध्ययन** (१९८८) इति शीर्षके विद्यावारिधिशोधप्रबन्धः सम्पादितः, यस्य चतुर्थेऽध्याये भट्टिकाव्यप्रयुक्तसमासस्य विश्लेषणं कृतम् ।

शकुन्तलादेव्या **संस्कृत समासों का ऐतिहासिक एवं भाषावैज्ञानिक अध्ययन** ( ख्रै.१९९३) इति शीर्षके विद्यावारिध्यनुसन्धानं विहितं, यत्र समासस्यैतिहासिकपृष्ठभूमिः, वैदिकभाषायां समासप्रयोगावस्था चेत्यादिषु विषयेष्वपि समीक्षा कृता प्राप्यते, किन्तु समस्तपदप्रयोगावस्थाविषये समग्रसर्वेक्षणं कृतं न दृश्यते । किञ्च समासप्रक्रिया संस्कृते भारोपीयभाषापरिवारादुत्तराधिकाररूपेण प्राप्तेति (देवी ; १९९३ : १ ) भ्रमपूर्णधारणापि तत्र शोधप्रबन्धे प्रस्तुतास्तीति तत्खण्डनस्याप्यावश्यकता दृश्यते ।

विजयप्रसादत्रिपाठिना **समासवृत्तिविमर्शः** (२०४७ ) इत्यस्मिन् शीर्षके विद्यावारिध्यनुसन्धानं प्रकाशितं, यत्र तेन समासनामकवृत्तेः विस्तारेण वर्णनं कृतम् । तत्र तेन शोधग्रन्थस्य तृतीयाध्याये समासस्यैतिहासिकताविषयेऽपि संक्षिप्तचर्चा कृता, यस्य विस्तारस्यावश्यकता दृश्यते ।

बिन्ध्या के. एस्. इत्यनयाऽनुसन्धात्र्या **उत्तररामचरितस्य व्याकरणम्** (ख्रै. २०१८) इत्यस्मिन् शीर्षके विद्यावारिधिशोधप्रबन्धः प्रस्तुतः, यत्र भवभूतिविरचितस्य उत्तररामचरितनाटकस्य व्याकरणिकदृशा विश्लेषणं विहितम् । तत्क्रमे च शोधप्रबन्धस्य तृतीयाध्याये उत्तररामचरितनाटकप्रयुक्तानां ४८३ समस्तपदानां विश्लेषणं विहितम् । भवभूतेरुत्तररामचरिते दीर्घसमासान्तपदानां प्रयोगाधिक्यं प्राप्यते, समासबहुला च भवभूतिभाषेति शोधप्रबन्धात्तस्माज्ज्ञातुं शक्यते ।

मनीषः कुमारः **'अर्जुनरावणीयम्' महाकाव्यस्य षष्ठात् दशमसर्गपर्यन्तं व्याकरणशास्त्रीयं भाषावैज्ञानिकञ्च समीक्षात्मकमध्ययनम्** (ख्रै. २०१८) इत्यस्मिन शीर्षके विद्यावारिध्यनुसन्धानं सम्पाद्य शोधप्रबन्धं प्रस्तुतवान्, यस्य तृतीयाध्याये तेन महाकाव्यप्रयुक्तसमस्तपदानां विग्रहप्रदर्शनपुरःसरं विश्लेषणं कृतम् ।

हरिलालपौडेलेन **मेधा** (वै.२०७४) नाम्न्या अनुसन्धानात्मिकायाः पत्रिकायाः प्रथमाङ्के **संस्कृतरचनाप्रकाशोद्धृतपञ्चतन्त्रामुखस्थसमस्तशब्दाध्ययनम्** इत्यस्मिन् शीर्षके लेखः प्रकाशितो यत्र पञ्चतन्त्रामुखभागप्रयुक्तसमस्तशब्दानां सङ्कलनं विश्लेषणञ्च कृतम्।

हरिलालपौडेलेन शोध (वै.२०७८) नाम्न्याः पत्रिकायाः नवमवर्षीयप्रथमाङ्के **श्रीरामानुजीयगीताभाष्य-प्रथमाध्यायस्थकतिपयजटिलसमस्तशब्दानामध्ययनम्** इत्यस्मिन् शीर्षके लेखः प्रकाशितो यत्र तेन श्रीरामानुजाचार्यकृतगीताभाष्यप्रथमाध्यायस्थकठिनसमस्तपदानां सङ्लनं विग्रहप्रदर्शनञ्च कृतम्।

पूवचर्चितैरनुसन्धातृभिः समासप्रयोगविषये स्वस्वशोधशीर्कानुसारेणाध्ययनं कृतम्, तदनुसारेणैव स्वकीयशोधप्रबन्धेषु शोधलेखेषु च चर्चापि विहिता, तथाप्यत्रोत्थापिताः समस्याः तैर्न समाहिताः । अत एव संस्कृतवाङ्मये समासप्रयोगस्येतिहासः कथमस्तीति ज्ञातुं तद्विषये स्थालीपुलाकन्यायेनापि किं न स्यात्, ऐतिहासिकसर्वेक्षणस्यावश्यकता दृश्यते। इमामेवावश्यकतां परिपूरयितुं लेखोऽयं निर्मितः।

## २ अनुसन्धानविधिः

अनुसन्धानमिदं मूलतः सर्वेक्षणात्मकं, वर्णनात्मकं, विश्लेषणात्मकञ्च विधिमाधृत्य कृतम् । अस्मिन्ननुसन्धानेऽव-लम्बितोऽध्ययनविधिर्यथा–

### २.१ अनुसन्धानस्वरूपम्

अत्रानुसन्धाने हि संस्कृतवाङ्मये समस्तपदप्रयोगावस्थां ज्ञातुमृग्वेदादिभ्यो विविधग्रन्थेभ्यः तथ्यरूपेण समस्तपदरूपसामग्रीः सङ्कलय्य तासां वर्णनं, विश्लेषणञ्च कृत्वा शब्दात्मको निष्कर्षः स्थापितोऽस्ति। अत एवेदं गुणात्मकमनुसन्धानमस्ति।

### २.२ अनुसन्धानस्य क्षेत्रं परिसीमा च

अस्मिन् शोधलेखे संस्कृतवाङ्मयस्थसमासप्रयोगस्यैतिहासिकं सर्वेक्षणं क्रियते। अत एवास्यानुसन्धानस्य क्षेत्रं संस्कृतवाङ्मयस्थः समासप्रयोगः । ऋग्वेदादयः संस्कृतवाङ्मयान्तर्गता ग्रन्था अत्र सर्वेक्षणस्य विषयाः सन्ति । समग्रसंस्कृतवाङ्मयस्याध्ययनं ततः समासप्रयोगस्य सर्वेक्षणञ्चैकस्मिन् लघुशोधलेखे न सम्भवतीति स्थालीपुलाकन्यायेन वेदोपनिषद्ब्राह्मणारण्यक-वाल्मीकीयरारामायण-महाभारत-विष्णुपुराण-श्रीमद्भागवत-पाणिनीयव्याकरणसूत्र-पूर्वमीमांसासूत्राऽऽपस्तम्बधर्मसूत्राणां, व्याकरणमहा-भाष्यस्य, श्रीशंकर-रामानुजाचार्य-विरचित-ब्रह्मसूत्र-भाष्ययोः, संस्कृतसाहित्येतिहासप्रमुखप्रतिनिधिभूतानां कालिदास-विष्णुशर्म-भारवि-माघ-भट्टि-भूमभट्ट-भवभूति-बाण-दण्डिनां प्रमुखसाहित्यिकरचनानां केचनांशा एव सर्वेक्षणविषयीकृताः। एषैवास्य शोधकार्यस्य परिसीमा।

### २.३ तथ्याङ्कसङ्कलनं तत्साधनानि च

अत्र वेदोपनिषद्ब्राह्मणारण्यक-वाल्मीकीयरारामायण-महाभारतादिभ्यः पूर्ववर्त्युपशीर्कोद्धृतस्रोतोभ्यः समस्तपदरूपसामग्रीणां सङ्कलनं कृतमिति प्रायः प्राथमिकस्रोतसः, कुत्रचिद्द्वितीयकस्रोतसश्च तथ्याङ्कसङ्कलनसाधनानि सन्ति।

## २.४ तथ्याङ्कविश्लेषणप्रक्रिया

अत्र विविधस्रोतोभ्यः सङ्कलितानां समस्तपदरूपतथ्याङ्कानां मूलतः सर्वेक्षणात्मकं, वर्णनात्मकञ्च विधिमाधृत्य विश्लेषणं कृतमस्ति । शोधकार्यस्यास्य मूलतः सर्वेक्षणात्मकत्वात् तथ्यविश्लेषणक्रम उदाहरणानि प्राशस्त्येन प्रस्तुतानि । तत्क्रमे च सैद्धान्तिकाधारत्वेनोपस्थापितां समाससम्बद्धपाणिनीयव्याकरणव्यवस्थाधृत्य ऋग्वेदादिसंस्कृतवाङ्मयग्रन्थेषु वर्तमानायाः समस्तपदप्रयोगावस्थायाः सर्वेक्षणात्मकं विश्लेषणं कृत्वा निष्कर्षो निष्कासितो विद्यते । अतोऽत्र तथ्याङ्कविश्लेषणाय मुख्यतया सर्वेक्षणात्मको वर्णनात्मकश्चेति विधिद्वयमवलम्बितम् ।

## ३ अनुसन्धानस्य सैद्धान्तिकपर्याधारः

समाससिद्धान्त एवास्य शोधकार्यस्य सैद्धान्तिकपर्याधारोऽस्ति । व्याकरणशास्त्रप्रचलितासु विविधासु शब्दव्युत्पत्तिप्रक्रियासु समासप्रक्रियाऽप्यन्यतमाऽस्ति। पाणिनिः (वै.२०४७) स्वकीयेऽष्टाध्यायीनाम्नि ग्रन्थे ‘प्राक्कडारात् समासः’ (२।१।३) इत्यत आरभ्य ‘कडाराः कर्मधारये’ (२।२।२८ ) इति सूत्रपर्यन्तमष्टोत्तरशतसूत्रैः समासप्रक्रियायाः वैज्ञानिकीं व्यवस्थां कृतवानस्ति । समासे ह्यनेकसमर्थपदानां सार्थकमेलनं क्रियते । एकाधिकसमर्थ-पदानां पदयोर्वा सार्थकरूपेण मेलनङ्कृत्वा विशिष्टैकपदीकरणं समासः ( पौडेलः ; २०७४ : १९० ) । ‘समसनं समासः, संक्षेपः, स चानेकपदैक्यम्’ (विट्ठलाचार्यः; १९२५ : ४६५), ‘समसनं = समासः, सङ्क्षेप इत्यर्थः । सङ्क्षेपश्चानेक-वस्तुविषयः' (शास्त्री, शुक्लश्च ; १९६५ : पृ १७) इत्यादिभिः पूर्वाचार्योक्तिभिरपि बहुपदबोध्यार्थस्याल्पपदैः संक्षेपेण बोधयितुं समासप्रक्रियाऽवलम्ब्यत इति सिद्ध्यति । समासात् प्राक् भिन्नभिन्नेषु पदेषु वर्तमाना शक्तिः समासानन्तरं नश्यति। तदा च कापि नवीना शक्तिरुदेति । अत एव वैयाकरणैः समासे भिन्ना विशिष्टा वा शक्तिः स्वीक्रियते (कौण्डभट्टः ; १९९९ : २३) । समासभेदाः कति सन्तीति प्रश्नस्योत्तरं किमाधारीकृत्य स वर्गीक्रियते इत्यस्मिन् विषये निर्भरते । अत एव चतुर्धा (पतञ्जलिः २०२० : ५७०), पञ्चधा ( आचार्यः ; २०४७ : ४७८), द्विधा, षोढा, अष्टाविंशतिधा ( अग्निपुराणम ; ३५५ : १ ) च तद्भेदाः प्रोक्ताः । समासानन्तरं पूर्वपदात्परा विभक्तेर्लुग् भवति न वेत्याधारेण समासः लुगलुग्भेदेन द्विविधः । प्रकारान्तरेणापि नित्योऽनित्यश्चेति समासोऽयं द्विविध उच्यते । अर्थप्राधान्याधारेण समासः १. अव्ययीभावः २. तत्पुरुषः, ३. बहुव्रीहिः ४. द्वन्द्वश्चेति चतुर्धेति प्राचीन-वैयाकरणाः । तत्र पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, अन्यपदार्थप्रधानो बहुव्रीहिः, उभयपदार्थप्रधानो द्वन्द्व इति अव्ययं विभक्ति० (अष्टा. २।१।६) इति सूत्रे भाष्यकारः (पतञ्जलिः २०२० : ५७०) । दीक्षितादिभिश्चाचार्यैः १. सुपां सुपा, २. सुपां तिङा, ३. सुपां नाम्ना, ४. सुपां धातुना, ५. तिङां तिङा, ६. तिङां सुबन्तेन चेति कृत्वा षड्विधः समासः स्वीक्रियते ( दीक्षितः ; २००८ : ९९) । अग्निपुराणे हि- अव्ययीभाव-तत्पुरुष-कर्मधारय-द्विगु-बहुव्रीहि द्वन्द्व-भेदेन षोढात्वम्, तेषां षण्णां प्रकारभेदेन चाष्टविंशतिधात्वमुक्तं दृश्यते ( अग्निपुराणम् ; ३५५ : १- १८) । समासप्रक्रियया व्युत्पन्नानि पदानि समस्तपदानि कथ्यन्ते । समाससम्बद्धामिमामेव व्यवस्थां सैद्धान्तिकपर्याधारत्वेनोपयुज्य ऋग्वेदादिसंस्कृतवाङ्मयग्रन्थेषु वर्तमानायाः समस्तपदप्रयोगावस्थायाः सर्वेक्षणात्मकं विश्लेषणं कृत्वा लेखोऽयं निर्मितः ।

## ४ समासप्रयोगस्यैतिहासिकं सर्वेक्षणम्

समासप्रयोगो नाम समस्तशब्दप्रयोगः । अतोऽत्र लेखे समस्तशब्दप्रयोगस्यैतिहासिकं सर्वेक्षणं विहितम् । तदर्थञ्च संस्कृतवाङ्मयान्तर्गतयोर्वैदिक-लौकिक-वाङ्मययोस्तदन्तर्गतप्रमुखग्रन्थानाञ्च सर्वेक्षणं कृतम् ।

## ४.१ वैदिकवाङ्मये समस्तशब्दप्रयोगावस्था

वैदिकवाङ्मये समस्तशब्दप्रयोगावस्थां ज्ञातुं ऋग्यजुःसामाथर्ववेदानाम्, उपनिषदां, ब्राह्मणग्रन्थानाम्, आरण्यक-ग्रन्थानाञ्च सर्वेक्षणं विहितमस्ति।

### ४.१.१ ऋग्वेदे समस्तपदप्रयोगः

ऋग्वेदो हि न केवलं संस्कृतवाङ्मयस्यैव, किन्तु संसारस्यैव सर्वप्राचीनतमो ग्रन्थोऽस्तीति पौरस्त्याः पाश्चात्त्याश्च विद्वांसो निर्विवादं स्वीकुर्वन्ति (गैरोला ; २०१७ : १०४ )। तत्रापि समस्तशब्दप्रयोगः प्राप्यते। स्थालीपुलाकन्यायेन ऋग्वेदस्य केषाञ्चिन्मन्त्राणामध्ययनं कृतम्, तेन चाध्ययनेन- अधिवक्ता, अपरिह्वृताः (ऋग्वेदः ; मण्डलम्- १, अध्याय-१५, सूक्तम्- १००, मन्त्रः- १९), कृष्णगर्भा, वज्रदक्षिणम् (ऋग्वेदः ; १।१५।१०१।१), द्यावापृथिवी (ऋग्वेदः ; १।१५।१०१।३), ब्रह्मवाहः (ऋग्वेदः ;१।१५। १०१।९), मरुत्स्तोत्रस्य (ऋग्वेदः ; १।१५।१०१।११), द्यावाक्षामा, सूर्याचन्द्रमसा (ऋग्वेदः ;१।१५।१०२।२), त्रिविष्टिधातु, नृपते (ऋग्वेदः ;१।१५।१०२।८) इत्यादीनि प्रायेण शब्दद्वयनिर्मितानि, लघ्वाकाराणि, सरलप्रकृतिकानि च समस्तपदानि प्रयुक्तानि प्राप्तानि।

### ४.१.२ शुक्लयजुर्वेदे समस्तपदप्रयोगः

समस्तशब्दप्रयोगावस्थां ज्ञातुं स्थालीपुलाकन्यायेन यजुर्वेदस्य केषाञ्चिन्मन्त्राणामध्ययनं कृतम्, तेन चाध्ययनेन- अयक्ष्मा, गोपतौ (शु.यजुः ; १।१) , विश्वधा, यज्ञपतिः (शु.यजुः ; १।२), शतधारं, सहस्रधारम्, कामधुक्षः (शु.यजुः ; १।३), विश्वायुः, विश्वकर्मा, विश्वधायाः (शु.यजुः ; १।४), व्रतपते (शु.यजुः ; १।५), अरातयः (शु.यजुः ; १ ।७), देवहूतमम् (शु.यजुः ;१ ।८), हविर्धानं, यज्ञपतिः (शु.यजुः ; १।९), अग्नीषोमाभ्यां (शु.यजुः ;१।१०), देववीतये ... (शु.यजुः ; १।१५), मधुजिह्वः, सङ्घातम, वर्षवृद्धम्, परापूतम्, परापूता, अरातयः, अपहतम्, हिरण्यपाणिः, अच्छिद्रेण (शु.यजुः ;१/१६) इत्यादीनि समस्तपदानि प्रयुक्तानि प्राप्तानि।

### ४.१.३ सामवेदे समस्तपदप्रयोगः

सामवेदे समस्तपदप्रयोगावस्था कीदृश्यस्तीति ज्ञातुम् ‘अग्न आ याहि वीतये गृणानो हव्यदातये’ (सामवेदः ; प्रथमः प्रपाठकः, प्रथमा दशती, प्रथमो मन्त्रः ) इत्यादीनां केषाञ्चिन्मन्त्राणामध्ययनं कृतम्। तेन चाध्ययनेन- हव्यदातये (सामवेदः ; १।१।१), विश्ववेदसम् (सामवेदः ; १।१।३), प्रेष्ठम्, अतिथिम् (सामवेदः ;१।१।५), विश्ववेदसम्, हव्यवाहम्, अमर्त्यम् (सामवेदः ; १।२।२), हविष्कृतः (सामवेदः ; १।२।३), जराबोध (सामवेदः ; १।२।५), गोपीथाय (सामवेदः ; १।२।६), वाजपतिः (सामवेदः ; १।३।१०), जातवेदसं (सामवेदः ; १।३।११) इत्यादीनि समस्तपदानि प्रयुक्तानि प्राप्तानि।

### ४.१.४ अथर्ववेदे समस्तपदप्रयोगः

अथर्ववेदे समस्तपदप्रयोगावस्था कीदृश्यस्तीति ज्ञातुम् ‘ये त्रिषप्ताः परियन्ति विश्वा रूपाणि बिभ्रतः। वाचस्पतिर्बला तेषां तन्वो अद्य दधातु मे’ ( अथर्ववेदः, काण्डम् -१, सूक्तम-१, मन्त्रः - १) इत्यादीनां केषाञ्चिन्मन्त्राणामध्ययनं कृतम्। तेन चाध्ययनेन- त्रिषप्ताः, परियन्ति, वाचस्पतिः (अथर्ववेदः ; १।१।१), शतवृष्ण्यम्, निषेचनम् (अथर्ववेदः ; १।३।४), यातुधानम् (अथर्ववेदः ; १।७। १), परमेष्ठिन्, जातवेदः, तनूवशिन्, यातुधानान् (अथर्ववेदः ; १।७।२), आगमदिनम्, बृहस्पते, अग्नीषोमा (अथर्ववेदः ; १।८।२) असुरः (अथर्ववेदः ; १।१०।१), अनृतम् , सत्यधर्मणः (अथर्ववेदः ; १। १०।३) इत्यादीनि समस्तपदानि प्रयुक्तानि प्राप्तानि।

**४.१.५ पुरुषसूक्ते समस्तपदप्रयोगः**

पुरुषसूक्तं ऋग्वेदे, यजुर्वेदे च प्राप्यते । सूक्तेऽस्मिन्नपि समस्तशब्दाः प्रयुक्ताः प्राप्यन्ते । तत्र प्रथममन्त्र एव सहस्रशीर्षा, सहस्राक्षः, सहस्रपात्, दशाङ्गुलम् (ऋग्वेदः ; १०।९०।१, यजुर्वेदः ; ३०।१) इत्यादयः समस्तशब्दाः प्रयुक्ताः प्राप्यन्ते । पुरुषसूक्तस्यान्येषु मन्त्रेष्वप्येतादृशः समासप्रयोगः प्राप्यते ।

**४.१.६ स्वस्तिवाचनमन्त्रेषु समस्तपदप्रयोगः**

**आ नो भद्राः क्रतवो यन्तु विश्वतः** इत्यादयः स्वस्तिवाचनमन्त्राः ऋग्वेदसंहितायां प्रथममण्डलस्य ऊननवतितमसूक्ते, यजुर्वेदस्य चतुस्त्रिंशत्तमेऽध्याये च प्राप्यन्ते । तत्र च- अदब्धासः, अपरीतासः, उद्भिदः, सुमतिः, थुषस्पतिम्, अदब्धासः, विश्ववेदाः, अरिष्टनेमिः, बृहस्पतिः, पृषदश्वा, पृश्निमातरः, सूरचक्षसः, देवहितम्, अदितिः (ऋग्वेदः ; १ । ८९।१-१०, यजुर्वेदः ; २५।१४-२३) इत्यादयः समस्तशब्दाः प्रयुक्ताः प्राप्यन्ते ।

एतावता सर्वेक्षणेन- ऋगादिवेदसंहिताग्रन्थेषु प्रायेण सरलप्रकृतिकानां शब्दद्वयनिर्मितसमस्तपदानामेव प्रयोगः कृतोऽस्तीति तथ्यं प्राप्तम् । त्रिविष्टिधातुः ( ऋग्वेदः ; १ ।१५।१०२।८) इत्यादीनां द्व्यधिकशब्दनिर्मितानां समस्तपदानां संख्याऽतिन्यूना दृश्यते तत्र ।

## ४.२ उपनिषत्सु समस्तपदप्रयोगः

उपनिषत्सु समस्तपदप्रयोगावस्था कीदृश्यस्तीति ज्ञातुम् ईश-केन-कठ-प्रश्न-तैत्तिरीय-श्वेताश्वतरोपनिषदां स्थालीपुलाकन्यायेन केषाञ्चिन्मन्त्राणामध्ययनं कृतम् । तेन चाध्ययनेन- असूर्या, आत्महतः (ईशा. ; ३), सर्वभूतेषु (ईशा. ; ६), अपापविद्धम् (ईशा. ; ८), सुपथा, अस्मज्जुहुराणम् ( ईशा. ; १८), प्रतिबोधविदितम्, अमृतत्वम् (केनोप. ; खण्ड-२, मन्त्र-४), पीतोदका, जग्धतृणा, दुग्धदोहा, निरिन्द्रिया । (कठोप. ; अध्याय- १, वल्ली- १ मन्त्रः - ३), अनुपश्य प्रतिपश्य (कठोप. ; १।१।६), वैश्वानरः, प्रविशति, अतिथिः (कठोप. ; १।१।७), आशाप्रतीक्षे, संगतम्, सूनृताम्, इष्टापूर्ते, पुत्रपशून् (कठोप. ; १।१।८), शतायुषः, पुत्रपौत्रान्, हस्तिहिरण्यम्, महदायतनम् (कठोप. ; १।१।१३), चिरजीविकाम्, महाभूमौ, कामभाजम् (कठोप. ; १।१।२४), विश्वरूपम्, जातवेदसम्, परायणम, ससहस्ररश्मिः (प्रश्नोप. ; प्रश्नः- १, मन्त्रः- ८), पायूपस्थे, चक्षुःश्रोत्रे, मुखनासिकाभ्याम् (प्रश्नोप. ; ५।२), एकशतं, द्वासप्ततिः, प्रतिशाखानाडीसहस्राणि (प्रश्नोप. ; ३।६ ), सर्वौषधम्, अन्नरसमयाद् (तैत्ति. वल्ली-२, अनुवाकः-२), आत्मभावात्, अनीशः, सुखदुःखहेतोः (श्वेता. अध्या. १, मन्त्रः -२), ध्यानयोगानुगता, देवात्मशक्तिम्, स्वगुणैः, निगूढाम्, निखिलानि, कालात्मयुक्तानि, अधितिष्ठति (श्वेता.; १।३), एकनेमिम्, त्रिवृतम्, षोडशान्तम्, शतार्धारम्, विंशतिप्रत्यराभिः, विश्वरूपैकपाशम्, त्रिमार्गभेदम्, द्विनिमित्तैकमोहम् ((श्वेता.; १।४), पञ्चस्रोतोऽम्बुम्, पञ्चयोन्युग्रवक्राम्, पञ्चप्राणोर्मिम्, पञ्चबुद्ध्यादिमूलाम्, पञ्चावर्ताम्, पञ्चदुःखौघवेगाम्, पञ्चाशद्भेदाम्, पञ्चपर्वाम् (श्वेता. १।५) इत्यादीनि समस्तपदानि प्रयुक्तानि प्राप्तानि ।

उपनिषत्सु ऋग्यजुःसामाथर्ववेदसंहितापेक्षया समस्तपदप्रयोगस्याधिक्यं दृश्यते । एतदतिरिक्तम्- वेदेषु प्रायः शब्दद्वयसमासः प्रयुक्तो दृश्यते चेद् उपनिषत्सु- प्रतिबोधविदितम् (केनोप. ; २।४), ससहस्ररश्मिः (प्रश्नोप. १।८), सुखदुःखहेतोः (श्वेता. १।२), देवात्मशक्तिम्, कालात्मयुक्तानि, (श्वेता. ; १।३), इत्यादीनि शब्दत्रययुतसमस्तपदानि, प्रतिशाखानाडीसहस्राणि (प्रश्नोप. ; ३।६ ), ध्यानयोगानुगता, विश्वरूपैकपाशम्, द्विनिमित्तैकमोहम् (श्वेता.; १।४), पञ्चयोन्युग्रवक्राम्,(श्वेता. १।५) इत्यादीनि शब्दचतुष्टययुतसमस्त-पदानि च प्रयुक्तानि दृश्यन्ते । क्वचित्तूपनिषन्मन्त्रेषु समस्तपदानामेव बाहुल्यं दृश्यते । यथा-

*पञ्चस्रोतोऽम्बुं पञ्चयोन्युग्रवक्राम्*
*पञ्चप्राणोर्मिं पञ्चबुद्ध्यादिमूलाम् ।*
*पञ्चावर्तां पञ्चदुःखौघवेगाम्*
*पञ्चाशद्भेदां पञ्चपर्वामधीमः (श्वेता. १।५) इत्यादि ।*

## ४.३ शतपथब्राह्मणे समस्तपदप्रयोगः

शतपथब्राह्मणग्रन्थे समस्तपदप्रयोगावस्था कीदृश्यस्तीति ज्ञातुम् 'पवित्रपूतो व्रतमुपायानीति...' (शतपथब्रा. काण्डः-१, प्रपाठकः-१, अध्यायः-१, ब्राह्मणः-१ मन्त्रः-१) इत्यादीनां केषाञ्चिन्मन्त्राणामध्ययनं कृतम् । तेन चाध्ययनेन- पवित्रपूतः (शतपथब्रा. १।१।१।१।१), अशनानशनस्य (शतपथब्रा. १।१।१।१।७), आहवनीयागारे, गार्हपत्यागारे (शतपथब्रा. १/१/१।१/११), व्रतपते (शतपथब्रा. १।१।१।१।१२), अनिरुक्तः, प्रजापतिः (शतपथब्रा. १/१/१।१/१३), असुररक्षसानि (शतपथब्रा. १/१/१।१/१६) इत्यादीनि शब्दद्वययुतलघ्वाकारसमस्तपदानि प्रयुक्तानि प्राप्तानि ।

## ४.४ आरण्यकग्रन्थेषु समस्तपदप्रयोगः

आरण्यकग्रन्थेषु समस्तपदप्रयोगावस्था कीदृश्यस्तीति ज्ञातुं शाङ्खायनारण्यकस्य ऐतरेयारण्यकस्य चाध्ययनं कृतम् । तेन चाध्ययनेन- प्रजापतिः, महाव्रतम्, चतुर्विंशतिः, संवत्सरस्य, अर्धमासाः (शाङ्खा. ; अध्या.- १, आर.-१), प्रेङ्खफलकम्, अन्नाद्यम्, दक्षिणोत्तरिणम्, उपस्थम् (शाङ्खा. ; १। ७), स्तोत्रियानन्तर्हिता, सूददोहसम्, सूददोहा (शाङ्खा. ; २। १), बार्हतराथन्तरौ, चतुर्विंशौ (शाङ्खा. ;२।५), आयुष्कामस्य (शाङ्खा. ;२।१६), आग्निमारुतसूक्तानि (शाङ्खा. ; २।१८), महाव्रतम् (ऐतरेया. ; आर.-१, अध्या.- १, मन्त्रः- १), ब्रह्मवर्चसम् ( ऐतरेया. ; १।१।३), इन्द्रवायू, उपनिष्कृतम् ( ऐतरेया. ; १।१।४), एतदहर्ब्रह्मणा (ऐतरेया. ; २।१।२), पूर्वपक्षापरपक्षान् (ऐतरेया. ; २।१।७), बृहतीसहस्रं, सम्पन्नम् (ऐतरेया. ; २।३।५) इत्यादीनि समस्तपदानि प्रयुक्तानि प्राप्तानि । ब्राह्मणग्रन्थापेक्षयाऽऽरण्यकग्रन्थेषु दीर्घसमासः प्रयुक्तो दृश्यते ।

# ५ लौकिकवाङ्मये समस्तशब्दप्रयोगावस्था

श्रीमद्वाल्मीकीयरामायणाल्लौकिकवाङ्मयं प्रारभ्यते, यतो हि तदेव महाकाव्यं लौकिकवाङ्मयलिखितप्रथमग्रन्थरूपेण ज्ञायते । अत एवात्र रामायणादीनां ग्रन्थानां लौकिकवाङ्मयरूपेणाध्ययनं क्रियते ।

## ५.१ आर्षमहाकाव्ययोः समस्तपदप्रयोगः

आर्षमहाकाव्यरूपेण श्रीमद्वाल्मीकीयरामायणं महाभारतञ्च परिचीयेते । तयोः समासप्रयोगावस्थाविषयेऽत्र वर्ण्यते ।

### ५.१.१ वाल्मीकीयरामायणे समस्तपदप्रयोगः

श्रीमद्वाल्मीकीयरामायणे समस्तपदप्रयोगावस्था कीदृश्यस्तीति ज्ञातुं स्थालीपुलाकन्यायेन विभिन्नकाण्डस्थेभ्यो विभिन्नसर्गेभ्यः कानिचन पद्यान्युद्धृत्य तेषामध्ययनं कृतम् । तेन चाध्ययनेन- तेजःक्षमायशःप्राप्ताः, स्मितपूर्वाभिभाषिणः (वा.रामा., बा.का. ; सर्ग- ७, श्लोक- ८ ), सपुत्रपौत्रम्, सामात्यम्, समन्त्रिज्ञातिबान्धवम्, दुराधर्षम्, देवर्षीणाम्, भयावहम्, दशवर्षसहस्राणि, दशवर्षशतानि, (वा.रामा., बा.का. ; १५।२८ -२९), रक्ताम्बरधरम्, रक्तास्यम्, दुन्दुभिस्वनम्, स्निग्धहर्यक्षतनुजश्मश्रुप्रवरमूर्धजम् (रामा., बा. का. ; १६/१२), अपश्यच्छोकसन्तप्तम्,

चिन्ताव्याकुलितेन्द्रियम् (वा.रामा., अयो. का. ; २६।६), शोकोपहतनिश्चेष्टाः, हतचेतसः (वा.रामा., अयो. का. २६।१), दिव्यचन्दनदिग्धाङ्गान्, दिव्याभरणभूषितान् (वा.रामा., अर.का. ; ३८/२७), कालमृत्युयुगान्ताभम्, (वा.रामा., कि.का. ; ३१।२०), क्षीरोदवेलानिलयाः, तमालवनवासिनः, नारिकेलाशनाः (वा.रामा., कि.का. २७/२५), महासत्त्वः, कपिकुञ्जरः , रम्यकाननतोयाढ्यां , रावणपालिताम् (वा.रामा., सु.का., ३/२), शारदाम्बुधरप्रख्यैः, उपशोभितम्, सागरोपमनिर्घोषाम्, सागरानिलसेविताम् (वा.रामा. , सु. का. ; ३ ।२), सुपुष्टबलसम्पुष्टाम्, चारुतोरणनिर्यूहाम्, पाण्डुरद्वारतोरणाम् (वा.रामा., सु. का. ; ३ । ४), कौञ्चबर्हिणसंघुष्टैः, राजहंसनिषेवितैः, तूर्याभरणनिर्घोषैः, परिनादिताम् (वा.रामा., सु. का. ; ३।११), गिरिमात्रशरीरस्य, महापरिघयोधिनः (वा.रामा., यु. का. ; १२।३७), महोर्मिमालावितत:, शङ्खशुक्तिसमावृतः, सधूमः, परिवृत्तोर्मिः, महोदधिः (वा. रामा., यु. का. ; २१।२९), आघूर्णिततरङ्गौघः, सम्भ्रान्तोरगराक्षसः, उद्वर्तितमहाग्राहः, सघोषः, वरुणालयः (वा. रामा., यु. का. २१।३२) इत्यादीनि समस्तपदानि प्रयुक्तानि प्राप्तानि । वाल्मीकीयरामायणे हि शब्दद्वयनिर्मिताद् आरभ्य स्निग्धहर्यक्षतनुजश्मश्रुप्रवरमूर्धजम् (वा. रामा., बा. का. ; १६/१२) इत्यादिसदृशानि नवशब्दनिर्मितानि समस्तपदान्यपि प्राप्तानि । वैदिकवाङ्मयापेक्षया लौकिकवाङ्मयस्य प्रथमग्रन्थे वाल्मीकीयरामायणमहाकाव्ये समस्तपदानामधिकः प्रयोगः कृतो दृश्यते । तत्र प्रयुक्तैः समस्तपदैः तस्मिन् महाकाव्ये भाषिकोत्कृष्टता, चामत्कारिकता, मनोहारिता च वर्धिताः दृश्यन्ते।

**५.१.२ महाभारते समस्तपदप्रयोगः**

महाभारते समस्तपदप्रयोगावस्था कीदृश्यस्तीति ज्ञातुं स्थालीपुलाकन्यायेन विभिन्नपर्वस्थेभ्यो विभिन्नाध्यायेभ्यः कानिचन पद्यान्युद्धृत्य तेषामध्ययनं कृतम् । तेन चाध्ययनेन- लोमहर्षणपुत्रः, उग्रश्रवाः, नैमिषारण्ये, कुलपतेः, द्वादशवार्षिके, सुखासीनान्, अभ्यगच्छद्, ब्रह्मर्षीन्, संशितव्रतान्, विनयावनतः, सूतनन्दनः, अनुप्राप्तम्, नैमिषारण्यवासिनः (म.भा. आदिपर्वणि अध्यायः- १, श्लोकः १-३ ), कृष्णद्वैपायनप्रोक्ता, सुपुण्या (म.भा. आदि. १/९), विचित्रार्थाः, महाभारतसंश्रिताः (म.भा. आदि. ; १।१०), महाभागाः, सूर्यपावकवर्चसः, कृताभिषेकाः, कृतजप्या, हुताग्नयः (म.भा. आदि. ; १।१३), वरारोहा, शीलाचारविचेष्टितैः (म.भा. आदि. १०३/१६), अनुशोचन्तः, कश्मलाभिहतौजसः, पर्युपासन्तः, शोकार्ताः, शारद्वतीसुतम् (म.भा.कर्ण., १।२), कृतपूर्वाह्णिकक्रियाः, कृतनिश्चयाः (म.भा., कर्ण. १।१३), अधिपतिः, सागरानूपवासिनाम्, देवराजस्य, धर्मात्मा, बहुमतः, भगदत्तः, महीपालः, क्षत्रधर्मरतः, धनञ्जयेन, यमसादनम् (म.भा. कर्ण. ; ५।१५-१६), वृष्ण्यन्धककुले (म.भा. महाप्रा.पर्व ; १।१), कालपर्यायधर्मवित् (म. भा. महाप्रा; ११।८), पितामह, महाप्राज्ञ, सर्वशास्त्रविशारद (म.भा. अनुशा. दानधर्म ; २।१), पञ्चभूतानि, अतिक्रान्तः, स्ववीर्यात्, मनोजवः, गृहस्थधर्मेण, कामक्रोधौ (म.भा. अनुशा. दानधर्म ; २/८७) इत्यादीनि समस्तपदानि प्रयुक्तानि प्राप्तानि । महाभारतेऽपि वैदिकवाङ्मयापेक्षया समस्तपदानामधिकः प्रयोगः कृतो दृश्यते, किन्तु वाल्मीकीयरारामायणे समस्तपदप्रयोगे या चामत्कारिकता, मनोहारिता चानुभूयते, न तथा महाभारतेऽनुभूयते । अत एव महाभारतापेक्षया वाल्मीकीयरामायणं समासप्रयोगगतचामत्कारिकतायां, मनोहारितायामुत्कृष्टतायाञ्चाग्रे दृश्यते।

इत्थञ्च द्वयोरार्षमहाकाव्ययोः समस्तपदप्रयोगप्राशस्त्यं दृश्यते । तयोर्मध्येऽपि रामायणे कवेः सुललितसमस्तपदप्रयोगचातुरी नितरां काव्यसौन्दर्यं वर्द्धयन्तीव सहृदयहृदयमाकर्षयन्तीव च प्रतिभाति।

## ५.२ पौराणिकवाङ्मये समस्तपदप्रयोगः

पौराणिकवाङ्मये यद्यप्यष्टादशपुराणानि, उपपुराणानि चागच्छन्ति, तथाप्यत्र स्थालीपुलाकन्यायेन सर्वेषां पुराणानां प्रतिनिधित्वेन श्रीविष्णुपुराण-श्रीमद्भागवतमहापुराणयोरेवाध्ययनं कृतम्।

### ५.२.१ श्रीविष्णुपुराणे समस्तपदप्रयोगः

श्रीविष्णुपुराणे समस्तपदप्रयोगावस्था कीदृश्यस्तीति ज्ञातुं स्थालीपुलाकन्यायेन विभिन्नांशस्थेभ्यो विभिन्नाध्यायेभ्यः कानिचन पद्यान्युद्धृत्य तेषामध्ययनं कृतम्। तेन चाध्ययनेन- इज्यायुधवाणिज्याद्यैः (श्रीविष्णुपुराण ; २।३।९), तापीपयोष्णीनिर्विन्ध्याप्रमुखाः, ऋक्षसम्भवाः (श्रीवि.पु. ; २।३।११), अशुभमतिः, असत्प्रवृत्तिसक्तः, अनार्यकुलशीलसङ्गमत्तः, अनुदिनकृतपापबन्धयुक्तः, पुरुषपशुः, वासुदेवभक्तः (श्रीवि.पु. ; ३।७।३१), चक्रप्रतिहतवीर्यबलस्य, अन्यलोक्यः (श्रीवि.पु.;३।७।३४), स्ववर्णोक्तधर्मानुष्ठानकारिणा (श्रीवि.पु. ; ३।८।११) जातकर्मादिक्रियाकाण्डम् (श्रीवि.पु. ; ३।१०।४), पादशौचासनप्रह्वस्वागतोक्त्या (श्रीवि.पु. ; ३।११।१०७), कूजत्कलहंसकारण्डवादिविहङ्गमाभिरामजलाशयाः (श्रीवि.पु. ; ४।२।९७), मनोऽनुकूलभक्ष्यभोज्यानुलेपनवस्त्रभूषणादिभोगः (श्रीवि.पु. ; ४।२।१०४) इत्यादीनि समस्तपदानि प्रयुक्तानि प्राप्तानि। तत्र चैकादशशब्दनिर्मितानि (श्रीवि.पु. ; ४।२।९७, ४।२।१०४ ) समस्तपदान्यपि प्रयुक्तानि दृश्यन्ते। विष्णुपुराणे हि समस्तपदप्रयोगगतचामत्कारिकता रामायण इव दृश्यते। आकारदृष्ट्या तु रामायणादपि दीर्घाकाराणि समस्तपदान्यत्र प्रयुक्तानि प्राप्यन्ते।

### ५.२.२ श्रीमद्भागवते समस्तपदप्रयोगः

श्रीमद्भागवते समस्तपदप्रयोगावस्था कीदृश्यस्तीति ज्ञातुं स्थालीपुलाकन्यायेन विभिन्नस्कन्धस्थेभ्यो विभिन्नाध्यायेभ्यः कानिचन पद्यान्युद्धृत्य तेषामध्ययनं कृतम्। तेन चाध्ययनेन- अदभ्रचक्षुषा, सहस्रपादोरुभुजाननाद्भुतम्, सहस्रमूर्धश्रवणाक्षिनासिकम्, सहस्रमौल्यम्बरकुण्डलोल्लसत् (श्रीमद्भागवतम् ; १।३।४), दर्शनस्पर्शसंलापशयनासनभोजनैः, अनुद्रुतचेतसः, स्नेहसम्बद्धाः, उद्गलद्बाष्पम्, देवकीसुते, बान्धवस्त्रियः (श्रीमद्भा. ; १।१०।१२-१४), प्रेमस्मितस्निग्धनिरीक्षणाननम्, सर्वसौभगम् (श्रीमद्भा. ; १।११।८), मधुभोजदशार्हार्हकुकुरान्धकवृष्णिभिः, आत्मतुल्यबलैः (श्रीमद्भा. ; १।११।११), सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः, उद्यानोपवनारामैः वृतपद्माकरश्रियम् (श्रीमद्भा. ; १।११।१२), सम्मार्जितमहामार्गरथ्यापणकचत्वराम्, गन्धजनैः फलपुष्पाक्षताङ्कुरैः (श्रीमद्भा. ; १।११।१४), प्रहर्षवेगोच्छशितशयनासनभोजनाः (श्रीमद्भा. ; १।११।१७), लसत्कुण्डलनिर्भातकपोल-वदनश्रियः (श्रीमद्भा. ; १।११।१९), वामबाहुकृतवामकपोलः, वल्गितभ्रुरधरार्पितवेणुम्, कोमलाङ्गुलिभिराश्रितमार्गम् (श्रीमद्भा. ; १०/३५/२), निजपदाब्जदलैः, ध्वजवज्रनीरजाङ्कुशविचित्रललामैः, व्रजभुवः, खुरतोदम्, वर्ष्मधुर्यगतिरीडितवेणुः (श्रीमद्भा. ; १०/३५/१६) इत्यादीनि समस्तपदानि प्रयुक्तानि प्राप्तानि। श्रीमद्भागवते हि समस्तपदानामत्यधिकः प्रयोगः कृतो दृश्यते। तत्र केषुचित् स्थलेषु तु पूर्णाः पङ्क्तय एव समस्तपदमयाः सन्ति। पञ्चमस्कन्धादौ गद्यात्मकस्थले क्वचिद्दीर्घसमासोऽपि कृतो दृश्यते। यथा- कुरङ्ग-कुरर-कुसुम्भ-वैकङ्क-त्रिकूट-शिशिर-पतङ्ग-रुचक-निषध-शिनीवास-कपिल-शङ्ख-वैदूर्य-जारुधि-हंसर्षभ-नाग-कालञ्जर-नारदादयः (श्रीमद्भा. ; ५।१६/२६) इत्यत्राष्टादशपदानां समासः दृश्यते। तत्र समस्तपदानां प्रयोगः सौन्दर्यमयः, चामत्कारिकः, कलात्मकः, तुलनात्मकरूपेण जटिलतायुक्तश्चास्ति।

इत्थञ्च पौराणिकवाङ्मये समस्तपदप्रयोगो दरीदृश्यते। निदर्शनरूपेण गृहीतयोर्द्वयोरपि पुराणयोः समस्तपदप्रयोगावस्थागतसाम्यं दृश्यते, यद्यपि तत्र श्रीमद्भागवतं तुलानात्मकरूपेण किञ्चित्समृद्धतमं दृश्यते।

### ५.३ सूत्रवाङ्मये समस्तपदप्रयोगः

सूत्रवाङ्मयप्रयुक्तसमस्तपदसर्वेक्षणक्रमे समग्रसूत्रवाङ्मयप्रतिनिधित्वेन पाणिनीयव्याकरणसूत्राणां, न्यायदर्शनसूत्राणां, पूर्वमीमांसासूत्राणां, ब्रह्मसूत्राणाम्, आपस्तम्बधर्मसूत्राणाञ्चाध्ययनं कृतम्।

#### ५.३.१ पाणिनीयसूत्रेषु समस्तपदप्रयोगः

व्याकरणशास्त्रपरम्परायामष्टाध्यायीनामकं पाणिनीयव्याकरणमग्रस्थानं लभते, प्रामाणिकतमत्वात् परिपूर्णत्वाच्च। पाणिनिर्हि विक्रमपूर्वोनत्रिंशत्तमशताब्दीयो मन्यते (मीमांसकः ; २०४१ : २२१ )। पाणिनिना स्वकीयाष्टाध्याय्यां समस्तपदबाहुल्ययुतानि सूत्राणि प्रणीतानि । अत्र स्थालीपुलाकन्यायेन केषाञ्चित् सूत्राणां सर्वेक्षणं कृत्वा तेषु समस्तपदप्रयोगावस्था प्रदर्श्यते।

मुखनासिकावचनः, अनुनासिकः (अष्टा.१।१।८), तुल्यास्यप्रयत्नम्, सवर्णम् (अष्टा.१।१।९), अज्झलौ (अष्टा.१।१।१०), ईदूदेद्, द्विवचनम्, प्रगृह्यम् (अष्टा.१।१।११), प्रथमचरमतयाल्पार्धकतिपयनेमाः (अष्टा.१।१।३३), पदान्तद्विर्वचनवरेयलोपस्वर-सवर्णानुस्वारदीर्घजश्चर्विधिषु (अष्टा.१।१।५८), गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्न-प्रकथनोपयोगेषु (अष्टा.१।३।३२), पोटायुवति-स्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैः (अष्टा.२।१।६५), स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्-भ्यस्ङसोसाम्ङ्योस्सुप् (अष्टा.४।१।२), टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः (अष्टा.४।१।१५) इत्यादि । इत्थञ्च पाणिनीयसूत्रेषु समासस्यात्यधिकप्रयोगः कृतः प्राप्यते । स्वौजसमौट्. (अष्टा.४।१।२) इत्यादीनि कतिपयसूत्राणि तु पूर्णतया समासमयानि सन्ति । तत्र स्वौजसमौट्. इति सूत्रे ह्येकविंशतिपदानां समासः कृतोऽस्ति । इत्थञ्च पाणिनीयसूत्रेषु क्वचिल्लघ्वाकारः क्वचिच्च दीर्घाकारः समासः कृतो दृश्यते। समासः खलु सूत्रात्मकतायै प्रयुज्यते। अतोऽपि सूत्रेषु तत्प्रयोगः कृतः स्यात् पाणिनिना।

#### ५.३.२ न्यायसूत्रेषु समासः

महर्षिगौतमप्रणीतानि न्यायदर्शनसूत्राणि हि पञ्चस्वध्यायेषु विभक्तानि सन्ति। तत्र प्रत्यध्यायमाह्निकद्वयं विद्यते। प्रत्याह्निकञ्च सूत्राणि संख्याक्रमेण विन्यस्तानि। न्यायदर्शनसूत्रेषु समासप्रयोगप्राशस्त्यं दृश्यते। यथा– प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानाम् तत्त्वज्ञानान्निःश्रेयसाधिगमः (१।१।१), दुःख-जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्गः (१।१।२), प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि। (१।१।३), सर्वतन्त्र-प्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् (१।१।२७), सव्यभिचार-विरुद्ध-प्रकरण-समसाध्य-समकालातीता हेत्वाभासाः (१।२।४), सहचरण-स्थान-तादर्थ्य-वृत्त-मान-धारण-सामीप्य-योग-साधनाधिपत्येभ्यो ब्राह्मण-मञ्च-कट-राज-सक्तु-चन्दन-गंगा-शाटकान्न-पुरुषेष्वतद्भावेऽपि तदुपचारः (२।२।६१), प्रणिधान-निबन्धाभ्यास-लिङ्ग-लक्षण-सादृश्य-परिग्रहाश्रयाश्रित-सम्बन्धानन्तर्य-वियोगैक-कार्य-विरोधातिशय-प्राप्ति-व्यवधान-सुख-दुःखेच्छा-द्वेष-भयार्थित्व-क्रिया-राग-धर्माधर्म-निमित्तेभ्यः (३।२।।४२), साधर्म्य-वैधर्म्योत्कर्षापकर्ष-वर्ण्यावर्ण्य-विकल्प-साध्य-प्राप्त्यप्राप्ति-प्रसङ्ग-प्रतिदृष्टान्तानुत्पत्ति-संशय-प्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्युप-लब्ध्यनुपलब्धिनित्यानित्य-कार्यसमाः (५।१।१), इत्यादि । अत्रोद्धृतसूत्रेषु 'अपि' (२।२।६१) इति शब्दं विहायान्ये सर्वेऽपि समासावयवाः। तत्र प्रथमसूत्र एव स्थूलावलोकने षोडषशब्दात्मकसमासो दृश्यते चेत् सूक्ष्मावलोकने कृते तत्रोपसर्गसमासस्यापि सत्त्वात् 'प्र-मान-प्र-मेय-सम्-शय-प्र-योजन-दृष्ट-अन्त-सिद्ध-अन्त-अव-यव-तर्क-निर्-नय-वाद-जल्प-वि-तण्डा-हेतु-आ-भास-छल-जाति-नि-ग्रह-स्थान' इत्यूनत्रिंशच्छब्दात्मकसमासोऽस्तीति प्राप्यते। एवमेव प्रणिधान-निबन्धाभ्यास... (३।२।।४२) इत्यत्र 'प्र-नि-धान-नि-

बन्ध-अभि-आस-लिङ्ग-लक्षण-सादृश्य-परि-ग्रह-आ-श्रय-आ-श्रित-सम्-बन्ध-आनन्तर्य-वि-योग-एक-कार्य-वि-रोध-अति-शय-प्र-आप्ति-वि-अव-धान-सुख-दुःख-इच्छा-द्वेष-भय-अर्थित्व-क्रिया-राग-धर्म-अ-धर्म-नि-मित्त' इति पञ्चचत्वारिंशच्छब्दात्मकः, साधर्म्य-वैधर्म्योत्कर्षापकर्ष... (५।१।१) इत्यत्र 'साधर्म्य-वैधर्म्य-उत्-कर्ष-अप-कर्ष-वर्ण्य-अ-वर्ण्य-वि-कल्प-साध्य-प्र-आप्ति-अ-प्र-आप्ति-प्र-सङ्ग-प्रति-दृष्ट-अन्त-न-(अन्)-उत्-पत्ति-सं-शय-प्र-करण-अ-हेतु-अर्थ-आपत्ति-अ-वि-शेष-उप-पत्ति-उप-लब्धि-न(अन्)-उप-लब्धि-नित्य-अ-नित्य-कार्य-सम' इति सप्तचत्वारिंशच्छब्दात्मकः समासः। एतेन महर्षिगौतमस्य समासप्रियत्वं सिद्ध्यति। सर्वेक्षणानेन क्वचिल्लघुसमासः, क्वचिन्मध्यमाकारसमासः, क्वचिच्च बहुदीर्घसमासः प्रयुक्तो दृष्टपथङ्गतः।

**५.३.३ पूर्वमीमांसासूत्रेषु समस्तपदप्रयोगः**

महर्षिजैमिनिविरचितानि पूर्वमीमांसासूत्राणि द्वादशाध्यायेषु, प्रत्यध्यायं चतुर्षु पादेषु च विभक्तानि सन्ति। तेषु सूत्रेषु महर्षिणा जैमिनिना समासस्य प्रयोगः कृतो दृश्यते। यथा - धर्मजिज्ञासा (पू.मी.सू. १।१।१), चोदनालक्षणः (पू.मी.सू.१।१।२), निमित्तपरीष्टिः (पू.मी.सू. १।१।३), सत्सम्प्रयोगे, पुरुषस्य, इन्द्रियाणां, बुद्धिजन्म, तत्प्रत्यक्षमनिमित्तं, विद्यमानोपलम्भनत्वात् (पू.मी.सू. १।१।४), परमदर्शनं, विषयानागमात् (पू.मी.सू. १।१।१३।), सन्नियमात्, प्रयोगसन्निकर्षः (पू.मी.सू.।१/२६), अनित्यदर्शनात् (पू.मी.सू. १।१/२८),शास्त्रदृष्टविरोधात् (पू.मी.सू. १।२/२), फलाभावात् (पू.मी.सू. १।२/३), अन्यानर्थक्यम् (पू.मी.सू. १।२।४), अभागिप्रतिषेधात् (पू.मी.सू. १।२।५), अनित्यसंयोगात् (पू.मी.सू. १।२।६), चोदनालिङ्गसंयोगे, तद्विकारः, प्रकृतिसन्निधानात् (पू.मी.सू. १०।४।२), यज्ञोत्पत्त्युपदेशे, अनुष्ठितकर्मयोगभेदात्, प्रतितन्त्रम् (पू.मी.सू. १२/१/४२) इत्यादि। इत्थञ्च पूर्वमीमांसासूत्रेषु महर्षिणा जैमिनिना समस्तपदानामधिकः प्रयोगः कृतो दृश्यते, यद्यपि तत्र दीर्घसमासो न प्रयुक्तः।

**५.३.४ ब्रह्मसूत्रेषु समासप्रयोगः**

महर्षिवेदव्यासप्रणीतब्रह्मसूत्राणि चतुर्ष्वध्यायेषु, प्रत्यध्यायं चतुर्षु पादेषु विभक्तानि सन्ति। ब्रह्मसूत्रेषु प्रायः समासप्रयोगः प्राप्यते। यथा- ब्रह्मजिज्ञासा (ब्र. सू.१।१।१ ), जन्मादि (१।१।२), शास्त्रयोनित्वात् (१।१।३) इत्यादौ शब्दद्वयात्मकः समासः, तद्धेतुव्यपदेशात् (१।१।१४), तद्धर्मोपदेशात् (१।१।२०) इत्यादौ शब्दत्रययुक्तः, जीवमुख्यप्राणलिङ्गात् (१।१।३१), श्रुतोपनिषत्कगत्यभिधानात् (१।२।१६) इत्यादौ शब्दचतुष्टयात्मकः, श्रवणाध्ययनार्थप्रतिषेधात् (१।३।३८) इत्यादौ पञ्चशब्दयुतः, हिताकरणादिदोषप्रसक्तिः (२।१।२१), विहितप्रतिषिद्धावैयर्थ्यादिभ्यः (२।३।४२) इत्यादौ च षट्शब्दयुतः। इत्थञ्च बह्मसूत्रेषु सरलप्रकृतिको लघ्वाकार एव समासः प्रयुक्तो दृश्यते।

**५.३.५ आपस्तम्बधर्मसूत्रेषु समस्तपदप्रयोगः**

श्रीमदापस्तम्बमहर्षिविरचितमापस्तम्बधर्मसूत्रं द्वयोः प्रश्नयोः विभक्तं दर्श्यते। तत्र प्रथमप्रश्नो द्वात्रिंशत्सु कण्डिकासु, द्वितीयप्रश्नश्च पञ्चदशसु कण्डिकासु विभक्तः। अस्य रचनाकालः इसापूर्वं ३००-२०० मन्यते ( पाण्डेयः ; २०२६ : १५)। तेषु सूत्रेषु महर्षिणाऽऽपस्तम्बेन समासस्य प्रयोगः कृतो दृश्यते। यथा- धर्मज्ञसमयः, प्रमाणम् (आप. ध. सू. १।१।२), आचार्यकुले, ब्रह्मचारिवासः (१/२/११), क्षरलवणमधुमांसानि (१।४।६), आहूताध्यायी (१।५।२६), आत्मप्रशंसां, परगर्हाम् (१।७।२४), उपसङ्ग्रहाद्, उच्छिष्टाशनाद्, आचार्यदारे (१/७/२७), उच्छिष्टाशनवर्जम्, आचार्यपुत्रे (१/७/३०) इत्यादि। इत्थञ्चापस्तम्बधर्मसूत्रेषु महर्षिणाऽऽपस्तम्बेनापि जैमिनना पूर्वमीमांसासूत्रेष्विव लघ्वाकाराणां समस्तपदानां प्रयोगः कृतो दृश्यते।

इत्थञ्च सूत्रवाङ्मये समासप्रयोगः प्राशस्त्येन दृश्यते । तत्र पाणिनीयसूत्रेषु न्यायसूत्रेषु च क्वचिल्लघ्वाकारः, क्वचिन्मध्यमाकारः, क्वचिद्बहुदीर्घाकारश्च समासः प्रयुक्तो दृश्यते । तत्रापि न्यायसूत्रेषु तु पाणिनीयसूत्रापेक्षयापि दीर्घाकारसमासो दृश्यते । अन्यसूत्रेषु लघ्वाकारो मध्यमाकारश्च समासः प्रयुक्तो दृश्यते ।

## ५.४ वृत्ति-भाष्यग्रन्थेषु समस्तपदप्रयोगः

वृत्तिभाष्यग्रन्थेषु समस्तपदप्रयोगावस्थां ज्ञातुं भावबोधिनीनामकपूर्वमीमांसावृत्तिग्रन्थस्य, पतञ्जलिविरचितव्याकरणमहा-भाष्यस्य, श्रीशंकराचार्यविरचितब्रह्मसूत्रभाष्यस्य, श्रीरामानुजाचार्यविरचित-श्रीभाष्यगीताभाष्ययोश्चाध्ययनं कृतम् । तत्सारोऽत्र प्रस्तूयते-

### ५.४.१ भावबोधिनीनामके वृत्तिग्रन्थे समस्तपदप्रयोगः

पूर्वमीमांसासूत्रोपरि विद्याशंकरविरचिते भावबोधिनीनामके वृत्तिग्रन्थे समासप्रयोगस्यावस्था कीदृश्यस्तीति स्थालीपुलाक-न्यायेन प्रस्तूयतेऽत्र –

**चोदनालक्षणोऽर्थो धर्मः** (पू. मी. सू. ; १।१।२) इति सूत्रस्य वृत्तौ विधिवाक्यम्, स्वर्गादीष्टम्, तत्साधनः, अग्निहोत्रादिः (भारती ; १९५१ : १) इति समस्तपदानि प्रयुक्तानि । तथैव- **तस्य निमित्तपरीष्टिः** (पू. मी. सू. ; १।१। ३ ) इति सूत्रस्य वृत्तौ- उक्तलक्षणलक्षितस्य, प्रमाणपरीक्षा (भारती ; १९५१ : १) इति समस्तपदे**, सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात्** (पू. मी. सू. ; १।१। ४ ) इति सूत्रस्य वृत्तौ- चक्षुरादीनाम्, प्रत्यक्षप्रमाणतया, रूपरसाद्यर्थेन, सन्निकर्षे, तादृशज्ञानस्य, वर्तमानार्थमात्रप्रत्यायकत्वात् (भारती ; १९५१ : २) इति समस्तपदानि प्रयुक्तानि । इत्थञ्च भावबोधिनीनामके वृत्तिग्रन्थे लघ्वाकाराणां सरलसमस्तपदानां प्रयोगो दृश्यते ।

### ५.४.२ व्याकरणमहाभाष्ये समस्तपदप्रयोगः

व्याकरणमहाभाष्ये लघ्वाकारयुतानि समस्तपदानि प्रयुक्तानि । उदाहरणरूपेण द्वितीयाह्निके **अइउण्** इति माहेश्वरसूत्रव्याख्यायां **आदित्यवत्स्यु**ः इति वार्तिके पतञ्जलिप्रयुक्तभाषाध्ययनेन- अनेकाधिकरणस्थः, देशपृथक्त्वेषु, श्रोत्रोपलब्धिः, बुद्धिनिर्ग्राह्यः, आकाश-देशः (पतञ्जलिः ; १९९५ : ६५) इत्यादीनि समस्तपदानि प्रयुक्तानि प्राप्तानि । इत्थमेव पतञ्जलिना सरलप्रकृतिकानि समस्तपदान्येव प्रयुक्तानि दृश्यन्ते ।

### ५.४.३ ब्रह्मसूत्रशाङ्करभाष्ये समस्तपदप्रयोगः

श्रीशंकराचार्यविरचिते शारीरकमीमांसानाम्नि ब्रह्मसूत्रभाष्येऽपि समासप्रयोगो दृश्यते । तस्य भाष्यस्य प्रस्तावनायां– अहंप्रत्ययिनम्, अशेषस्वप्रचारसाक्षिणि, प्रत्यगात्मनि, सर्वसाक्षिणं, तद्विपर्ययेण, अन्तःकरणादिषु, अनादिः, अनन्तः, अध्यासः, मिथ्याप्रत्ययरूपः, कर्तृत्वभोक्तृत्त्वप्रवर्तकः, सर्वलोकप्रत्यक्षः (सरस्वती ; २०१४ : १७ - १८ ) इत्येतादृशानि समस्तपदानि प्रयुक्तानि । तत्रत्या भाषा समासबहुला दृश्यते, किन्तु तत्र बहुदीर्घाकारसमासो न दृश्यते ।

### ५.४.४ श्रीभाष्ये समस्तपदप्रयोगः

श्रीरामानुजाचार्यविरचिते शारीरकमीमांसाश्रीभाष्यनाम्नि ब्रह्मसूत्रभाष्येऽपि समासप्रयोगो दरीदृश्यते । तस्य भाष्यस्य 'अथातो ब्रह्मजिज्ञासा' (ब्र. सू. १।१।१) इति सूत्रभाष्ये –

ब्रह्मशब्देन, निरस्तनिखिलदोषः, अनवधिकातिशयासङ्ख्येयकल्याणगुणगणः, पुरुषोत्तमः, बृहत्त्वगुणयोगेन, इष्यमाण-प्रधानत्वाद्, मीमांसापूर्वभागज्ञातस्य, अल्पास्थिरफलत्वाद्, उपरितनभागावसेयस्य, ब्रह्मज्ञानस्य,

अनन्ताक्षयफलत्वात्, पूर्ववृत्तात्, कर्मज्ञानाद्, अनन्तरम् (रामानुजाचार्यः ; १९९४ : ३ ) इत्येतादृशानि समस्तपदानि प्रयुक्तानि। तत्रत्या भाषा समासबहुला दृश्यते, शांकरभाष्यतुलनया दीर्घाकारसमासयुता च।

**५.४.५ श्रीरामानुजाचार्यविरचिते गीताभाष्ये समस्तपदप्रयोगः**

श्रीरामानुजाचार्यविरचिते गीताभाष्ये दीर्घाकाराणां समस्तपदानामप्यधिकप्रयोगः प्राप्यते । यथा- स्वाभिमतानुरूपैक-रूपाचिन्त्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्यसौगन्ध्यसौन्दर्यसौकुमार्यलावण्ययौवनाद्यनन्तगुणनिधिदिव्यरूपः (गोयन्का ; २०५० :९), स्वसङ्कल्पानुविधायिस्वरूपस्थितिप्रवृत्तिभेदाशेषशेषतैकरतिरूपनित्यनिरवद्यनिरतिशय-ज्ञानक्रियैश्वर्याद्यनन्तगुणगणापरिमितसूरिभिः, स्वोचितविविधविचित्रानन्तभोग्यभोगोपकरणभोगस्थानसमृद्धा-नन्ताश्चर्यानन्तमहाविभवानन्तपरिमाणनित्यनिरवद्याक्षरपरम-व्योमनिलयः (गोयन्का ; २०५० : १० ) इत्यादि । दीर्घसमासप्रयोगदृष्ट्या श्रीरामानुजाचार्यविरचितगीताभाष्यं ह्येतत्सर्वेक्षणविषयभूतान् सर्वानपि ग्रन्थानतिशेते।

इत्थञ्च वृत्तिभाष्यग्रन्थेषु मध्ये भावबोधिनीनामकपूर्वमीमांसावृत्तिग्रन्थे व्याकरणमहाभाष्ये च लघ्वाकारयुतानि समस्तपदानि प्रयुक्तानि । श्रीशंकराचार्यविरचितब्रह्मसूत्रभाष्ये लघ्वाकारयुतानि मध्यमाकारयुतानि च समस्तपदानि प्रयुक्तानि । श्रीरामानुजाचार्यविरचितयोः श्रीभाष्य-गीताभाष्ययोस्तु लघुमध्याकारयुतातिरिक्तं बहुदीर्घाकाराणां समस्तपदानामप्यधिकप्रयोगः प्राप्यते। अतो दीर्घसमासप्रयोगदृष्ट्या श्रीरामानुजाचार्योऽग्रस्थाने दृश्यते।

## ५.५ साहित्यरचनासु समासप्रयोगः

साहित्यरचनासु समासप्रयोगस्य सर्वेक्षणाय स्थालीपुलाकन्यायेन संस्कृतसाहित्येतिहासस्य प्रमुखप्रतिनिधिभूतानां कालिदास-विष्णुशर्म-भारवि-माघ-भट्टि-भूमभट्ट-भवभूति-बाण-दण्डिनां प्रमुखसाहित्यिकरचनानामध्ययनं कृतम् । तदनुसारेण तत्तत्कृतिषु समस्तपदप्रयोगावस्था कीदृश्यस्तीति संक्षेपेण चर्च्यतेऽत्र।

तत्र महाकविकालिदासः ई.पू. प्रथमशतककालीनो मन्यते (मिश्रः; २०१७: ४४), यस्याभिज्ञानशाकुन्तलस्य रघुवंशमहाकाव्यस्य चावलोकनं कृतम् । तत्राभिज्ञानशाकुन्तलनाटके- सुभगसलिलावगाहाः, पाटलसंसर्गसुरभिवनवाताः, प्रच्छायसुलभनिद्राः, परिणामरमणीयाः (अभिज्ञानशा. ; १ : ३ ), शुकगर्भकोटरमुखभ्रष्टाः, प्रस्निग्धाः, इङ्गुदीफलभिदः, विश्वासोपगमाद् , अभिन्नगतयः, तोयाधारपथाः इत्यादीनि समस्तपदानि प्रयुक्तानि। तत्र हि समासस्य सहजप्रयोगो दृश्यते । महाकविकालिदासप्रणीते रघुवंशमहाकाव्येऽपि सुखस्पर्शैः, शालनिर्यासगन्धिभिः, पुष्परेणूत्किरैः, आधूतवनराजिभिः ( रघुवं. १: ३८), परस्पराक्षिसादृश्यम्, अदूरोज्झितवर्त्मसु, मृगद्वन्द्वेषु, स्यन्दनाबद्धदृष्टिषु ( रघुवं. १: ४०), क्रियाविधौ, कालवित्, कुशिकवंशवर्द्धनः, इष्वसनदर्शनोत्सुकम् ( रघुवं. २ : ३७) इत्यादीनि समस्तपदानि प्रयुक्तानि।

विष्णुशर्मणा तृतीये द्वितीये वा ख्रीष्टशतके प्रणीतः पञ्चतन्त्रनामकविश्वप्रसिद्धबालोपयोगिकथाग्रन्थः ( मिश्रः ; २०१७ : १७७ ) नीतिविषयको महत्त्वपूर्णः ग्रन्थोऽस्ति, यत्र समस्तपदानामपि स्वाभाविकः प्रयोगः कृतो दृश्यते । तत्कथामुखभागस्थानां हरिवरुणयमाः, चन्द्रादित्यौ, सरस्वत्युदधियुगनगाः, सकलार्थिद्रुमः, प्रवरमुकुटमणिमरीचि-मञ्जरीचर्चितचरणयुगल इत्यादीनां सप्ततिसंख्याकसमस्तपदानामनेनैवानुसन्धात्राऽध्ययनं कृतमस्ति (पौडेलः ; २०७४ : १८९-२०४) । तद्ग्रन्थस्य मित्रभेदादिष्वन्यभागेष्वपि धर्मोपार्जितभूरिविभवः, शय्यारूढस्य (पञ्चतन्त्रम् ; १९९७ : ८), गान्धिकव्यवहारः, निक्षेपप्रवेशः, परिचितग्राहकागमः, मिथ्याक्रय-कथनं, देशान्तराद्, भाण्डानयनम् (पञ्चतन्त्रम् ;

१९९७ : १०), स्वामिप्रसादरहितौ, क्षुत्क्षामकण्ठौ, सञ्जीवककवचनाऽनुरक्तः, स्वव्यापारपराङ्मुखः (पञ्चतन्त्रम् ; १९९७ : ५३), प्रविरलदूर्वाङ्कुरान्, मरकतसदृशशष्पप्रायः, नदीसनाथः (पञ्चतन्त्रम् ;१९९७ : ३३०) इत्यादीनि सरलप्रकृतिकान्यनेकानि समस्तपदानि प्रयुक्तानि दृश्यन्ते।

भारवेः समयः षष्ठेसवीयशतकं मन्यते (मिश्रः; २०१७: ५१) । तद्विरचिते किरातार्जुनीयमहाकाव्ये भूभृतः, सौष्ठवौदार्यविशेषशालिनीम्, विनिश्चितार्थाम् (किराता. ; १ : ३), मदसिक्तमुखैः, मृगाधिपः (किराता. ; २ : १८), इति समस्तपदानि प्रयुक्तानि दृश्यन्ते।

शिशुपालवधमहाकाव्यरचयितुर्माघस्य समयः सप्तमशतकप्रारम्भोऽस्तीति निश्चिन्वन्ति विद्वांसः (मिश्रः; २०१७ : ५३) । महाकाव्येऽस्मिन् जगन्निवासः, वसुदेवसद्मनि, हिरण्यगर्भाङ्गभुवम् (शिशुपालवधम् ; १ : १) , विदग्धलीलोचितदन्तपत्रिकाचिकीर्षया (शिशुपालवधम् ;१:६०), मदिरास्वादमदपाटलितद्युती, रेवतीदशनोच्छिष्टपरिपूतपुटे (शिशुपालवधम् ; २ : १६), आश्लेषलोलुपवधू-स्तनकार्कश्यसाक्षिणीम्, अभिमानोष्णैः वनमालां, मुखानिलैः (शिशुपालवधम् ; २ : १७) इति समस्तपदानि प्रयुक्तानि।

महाकविर्भट्टिः सप्तमशतकीयः मन्यते, येन व्याकरणसम्बन्धिनियमशिक्षणोद्देश्येन द्वाविंशतिसर्गात्मकं १६२९ श्लोकयुतं भट्टिकाव्यनामकं शास्त्रकाव्यरूपेणापि परिचितं महाकाव्यं रचितम् ( मिश्रः ; २०१७ : ७२) । भट्टिकवेर्मुख्यमुद्देश्यं काव्यमाध्यमेन व्याकरणिकनियमशिक्षणमस्ति । काव्यस्य त्रयोदशसर्गे विशेषतो दीर्घबहुव्रीहिसमासस्य प्रयोगः कृतः प्राप्यते। यथा-

*हरि-रव-विलोल-वारण-गम्भीराऽऽवद्ध-स-रस-पुरु-संरावम्,*
*घोणा-संगम-पङ्काऽऽ-विल-सुबल-भर-महोरु-वराहम् ।*
*लङ्काऽऽलय-तुमुलाऽऽरव-सुभर-गभीरोरु-कुञ्ज-कन्दर-विवरम्,*
*वीणा-रव-रस-सङ्गम-सुर-गण-संकुल-महा-तमाल-च्छायम् (शर्मा ; १९८८ : ७४ -७५ ) इत्यादिः ।*

अर्जुनरावणीयमित्याख्यमहाकाव्यरचयिता भूमभट्टो माघोत्तरकालिको मन्यते ( कुमारः ; २०१८ : पृ १९ ) ।तस्मिन् महाकाव्ये पाणिनीयाष्टाध्याय्याः क्रमेण प्रकरणविभाजनं ततश्च काशिकायाः उदाहरणानां केषाञ्चित् अन्येषामपि तदनुरूपाणाम् उदाहरणानां प्रयोगाः दृश्यन्ते । अतः अर्जुनरावणीयं ग्रन्थोऽयं प्राचीनव्याकरणपद्धत्या व्याकरणशिक्षणे अतीव उपयोगी सिद्ध्यति। ( कुमारः ; २०१८ : पृ १२ )। सप्तविंशतिसर्गात्मकस्य तस्य महाकाव्यस्य सप्तमे सर्गे विशेषतः समस्तपदानां प्रयोगः प्राचुर्येण प्राप्यते। यथा –

**मार्दङ्गिकपाणविकं गदापरिघपट्टसम् । दधानं राक्षससभं विवेश सचिवैस्सह । पुण्डरीकातिरात्रस्य विघातपटुभिर्वृतम् । पदकक्रमकेणाऽपि मानुषामिषभोजिना । आह्वकन्थं सुदूरस्थं तत्रस्थोऽपि भुनक्ति सः । प्रतापाक्रान्तदिक्चक्रो द्वितीय इव भानुमान्।** ( कुमारः ; २०१८ : ७७- १०९) इत्यादि ।

महाकविः भवभूतिः समास-घटितवाक्यप्रयोगशीलः महान् वैयाकरणोऽस्तीति ज्ञायते । भवभूतेः समयः सप्तशतकासन्नः प्रतिपाद्यते विविधैः साक्ष्यैः ( मिश्रः ; २०१७ : ११०) । महाकविभवभूतिकृतिष्वपि समासप्रयोगाः प्राचूर्येण दृश्यन्ते । तत्कृतिष्वेकमुत्तररामचरितम् । एतन्नाटकदर्शनादेव भवभूतेः साहित्ये- अविरलनिविष्टनीलबहुलच्छायातरुषण्डमण्डितानि, अविरलमिलितविकचकनककमलकमनीयसंहतिः, अविरलानोकहनिवहनिरन्तरस्निग्धनीलपरिसरारण्यपरिणद्धगोदावरीमुखरकन्दरः, आकारानुभावगाम्भीर्यसंभाव्यमानविविधलोकोत्तरसुचरितातिशयम् (के.एस. ; २०१८ : १४६-१५१), इत्येतादृशानां दीर्घसमस्तपदानां प्रयोगः प्राप्यते। तच्छैली हि प्रौढा समासाडम्बरशालिनी किञ्चित् कृत्रिमा च भवति। तेषु प्रयुक्तेषु

सर्वसमासेषु प्रायः तत्पुरुषसमासः तद्भेदाश्चाधिकं दृश्यन्ते । बहुत्र बहुविधसमासैः गर्भितसमासप्रयोगेन नितरामाश्चर्यमुत्पादयति महाकविः ( के. एस्. ; २०१८ : २३४)।

कादम्बर्या रचयितुर्बाणभट्टस्य समयः सप्तमशतक इति कथ्यते (मिश्रः; २०१७: १५४)। कादम्बरी समासबहुला कृतिरस्ति । स्थालीपुलाकन्यायेनैकस्यैव पृष्ठस्यावलोकनेन प्राप्तानि समस्तपदानि यथा- नरपतिकथनानन्तरम्, मातङ्गकुमारीं, नरपतिसहस्र-मध्यवर्तिनम्, अशनिभयपुञ्जितशैलमध्यगतमिव कनकशिखरिणम्, अनेकरत्नाभरणकिरणजालकान्तरितावयवमिन्द्रायुधसहस्र-सञ्छादिताष्टदिग्विभागमिव जलधरदिवसम्, अवलम्बितस्थूलमुक्ताकलापस्य, कनकशृङ्खलानियमितमणिदण्डिकाचतुष्टयस्य, गगन-सिन्धुफेनपटलपाण्डुरस्य, दुकूलवितानस्य, इन्दुकान्तमणिपर्य्यङ्किकानिषण्णम्, उद्धूयमानकनकदण्डचामरकलापम् ... (बाणभट्टः ; २०३८ : २४ ) इत्यादिः। तस्मिन् काव्यग्रन्थे हि प्रायः समस्तपदानामेवाधिक्यं दृश्यते।

दशकुमारचरितमहाकाव्यरचयिता दण्डी हि सप्तमशतकान्तभागकालीनोऽस्ति, तत्समयपूर्वसीमा तु षष्ठशतकं मन्तव्यमिति (मिश्रः; २०१७: १६३) इतिहासविदो निर्धारयन्ति। महाकाव्यमिदं समासप्रयोगदृष्ट्या महत्त्वपूर्णं दृश्यते। अस्य मङ्गलाचरण एव- ब्रह्माण्डच्छत्रदण्डः, शतधृतिभवनाम्भोरुहः, नालदण्डः, क्षोणीनौकूपदण्डः, क्षरदमरसरित्पट्टिकाकेतुदण्डः, ज्योतिश्चक्राक्षदण्डः, त्रिभुवनविजयस्तम्भदण्डः, अङ्घ्रिदण्डः, विबुधद्वेषिणाम्, कालदण्डः ( दण्डी ; १८२२ : १) इति समस्तपदानि प्रयुक्तानि । गद्यात्मकेऽस्मिन् काव्ये- शश्वदगण्यपण्यविस्तारितमणिगणादिवस्तुजातव्याख्यातरत्नाकरमाहात्म्या, वीरभटपटलोत्तरङ्गतुरङ्गकुञ्जर-मकरभीषणसकलरिपुगणकटकजलनिधिमथनमन्दरायमाणसमुद्दण्डभुजदण्डः, पुरन्दरपुराङ्गणवनविहरणपरायणगीर्वाणतरुणगणिकागण-जेगीयमानयातिमानया शरदिन्दुकुन्दघनसारनीहारहारमृणालमरालसुरगजनीरक्षीरगिरिशाट्टहासकैलासकाशनीकाशमूर्त्या... ( दण्डी ; १८२२ : १-२) इत्यादीनि समस्तपदानि प्रयुक्तानि। अत्र हि महाकाव्ये प्रायः समस्तपदान्येव प्रयुक्तानि।

इत्थञ्च संस्कृतवाङ्मयस्य साहित्यिकरचनासु समासप्रयोगस्याध्ययनेन तत्र यथोत्तरं दीर्घसमासप्रयोगाधिक्यं दृश्यते । कालिदाससमये लघ्वाकारसमासस्य प्रयोगः कृतः प्राप्यते चेत् सप्तमशताब्दीकालिकरचनासु दीर्घसमासयुतरचना रचिता दृश्यन्ते। तत्रापि गद्यसाहित्ये त्वतिदीर्घसमासप्रयोगः प्राप्यते। इत्थञ्च समासप्रयोगदृष्ट्या संस्कृतसाहित्यं समृद्धतमं दृश्यते। एवञ्च समग्रलौकिकवाङ्मये स्थालीपुलाकन्यायेनावलोकिते सतीदं तथ्यं प्राप्तं यत्– लौकिकवाङ्मये समासप्रयोगाधिक्यं दृश्यते, तत्रापि सप्तमशतकीये साहित्ये एकादशशतकीयश्रीरामानुजीयकृतिषु च बहुदीर्घसमासप्रयोगः प्राचूर्येण दृश्यते।

## ६ समासः संस्कृतस्यैव मौलिकवैशिष्ट्यम्

समासः खलु संस्कृतस्य मौलिकवैशिष्ट्यमस्ति। संस्कृतभाषा हि दैवी वागस्ति ( वाक्यपदीयम् : १५३ )। अत एवेयमनादिभाषा। संस्कृते यानि भाषिक-व्याकरणिक-वैशिष्ट्यानि प्राप्यन्ते, न तानि कुतोऽप्यानीतानि। किन्त्वेतद्विषये कश्चिद्भ्रमोऽपि दृष्टिपथमागच्छति । अनुसन्धात्री शकुन्तला देवी संस्कृले प्राचीनकालत एव समासप्रक्रिया विद्यमानास्तीति स्वीकुर्वन्त्यपि प्रक्रियेयं संस्कृते भारोपीयभाषापरिवारादुत्तराधिकाररूपेण प्राप्तेति कथयति। यद्यपि सा स्वयं ऋग्वेदे समासस्यास्तित्वं स्वीकरोति। समासः संस्कृतस्य महत्त्वपूर्णवैशिष्ट्यमित्यपि सा स्वीकरोति ( देवी ; १९९३ : १ ) ऋग्वेदः संसारस्यैव प्रथमः भाषिकग्रन्थोऽस्तीति सर्वसम्मतं मतम्। तत्र समासः प्रयुक्तोऽस्तीति तेनैव सिद्ध्यति यत् - समासः संस्कृतभाषाया मौलिकप्रक्रियास्तीति । एतत्तु वक्तुं शक्यते यत् - संस्कृतभाषात एवान्यासु भाषासु

समासप्रक्रिया अनुकरणरूपेण गतास्तीति । यतो हि सा स्वयमेव वैदिकभाषायां प्रयुक्तानां तत्पुरुष-बहुव्रीह्यव्ययीभाव-द्वन्द्वादिसमासानां बहून्युदाहरणानि प्रस्तौति ( देवी ; १९९३ : २७- ३६) । वेदाः खल्वपौरुषेया मन्यन्ते । ते खलु परमेश्वरनिःश्वासोद्भूता इति सायणाचार्यादयः सर्वे विद्वांसः कथयन्ति । ( उपाध्यायः , चौबे च ; २०५२ : प्रस्ता. : ५९) । वेदः विश्वस्यैव प्राचीनतमवाङ्मयमस्तीति विषये सर्वेषां भारतीयानां पाश्चात्यानाञ्च विदुषामैकमत्यं प्राप्यते । (चौबे, ; २०५२ : प्रस्ता. : ६३ ) अत एव समासप्रक्रिया संस्कृतभाषयाऽन्यभाषातो गृहीतेति कथनं सर्वथाऽनुचितं, भ्रमपूर्णञ्चास्ति ।

## ७ निष्कर्षः

व्याकरणशास्त्र-प्रचलितासु विविधासु शब्दव्युत्पत्तिप्रक्रियासु समासप्रक्रियाऽप्यन्यतमाऽस्ति। समासो हि संस्कृतभाषाया महत्त्व-पूर्णवैशिष्ट्यरूपेण परिचीयेते । समासो नाम सार्थक-संक्षेपीकरणम् । संस्कृतवाङ्मये कदा प्रभृति समस्तशब्दानां प्रयोगः प्रारब्ध ? संस्कृत-वाङ्मयेतिहासे समस्तशब्दप्रयोगस्यावस्था कीदृश्यस्ति ? इत्येतादृशानां समस्यामूलकप्रश्नानां समाधानान्वेषणायात्रानुसन्धानात्मकलेखे समस्तशब्दप्रयोगस्यैतिहासिकं सर्वेक्षणं विहितम् । तदर्थञ्च संस्कृतवाङ्मयान्तर्गतयोर्वैदिकवाङ्मयलौकिकवाङ्मययोस्तदन्तर्गतप्रमुखग्रन्था-नाञ्च स्थालीपुलाकन्यायेन सर्वेक्षणं कृत्वा विविधग्रन्थेभ्यः तथ्यरूपाः सामग्रीः सङ्कलय्य तासां वर्णनं, व्याख्यानं विश्लेषणञ्च कृतम् । अनेनाध्ययनेन प्राप्तो निष्कर्षश्चात्र प्रस्तूयते–

संस्कृतवाङ्मये प्रारम्भकालादेव समासप्रक्रिया प्रचलिताऽऽसीत्, किन्तु तदा सरलप्रकृतिकानां लघ्वाकाराणां समस्तपदानां प्रयोगः क्रियते स्मेति तथ्यं वैदिकवाङ्मयसर्वेक्षणेन प्राप्तम् । ऋगादिवेदसंहिताग्रन्थेषु प्रायः शब्दद्वयनिर्मितसमस्तपदानामेव प्रयोगः कृतो दृश्यते । उपनिषत्सु समस्तपदप्रयोगस्याधिक्यं दृश्यते । तत्र शब्दचतुष्टययुतसमस्तपदान्यपि प्राप्यन्ते । ब्राह्मणग्रन्थेषु प्रायः शब्दद्वययुतलघुसमासप्रयोगो दृश्यते । आरण्यकग्रन्थेषु शब्दचतुष्टययुतानि समस्तपदान्यपि प्राप्यन्ते । वाल्मीकीयरामायणे हि शब्दद्वयनिर्मितादारभ्य नवशब्दनिर्मितानि समस्तपदान्यपि प्राप्तानि । तत्र समस्तपदानामधिकः प्रयोगः कृतो दृश्यते । तत्र समस्तपदैर्भाषिकोत्कृष्टता, चामत्कारिकता, मनोहारिता च वर्धिताः दृश्यन्ते । महाभारते समस्तपदप्रयोगो वैदिकवाङ्मयापेक्षयाऽधिकः वाल्मीकीयरामायणापेक्षया न्यूनः प्राप्यते । विष्णुपुराणे हि एकादशशब्दनिर्मितानि समस्तपदान्यपि प्रयुक्तानि दृश्यन्ते । तत्र हि समस्तपदप्रयोगगतचामत्कारिकता रामायण इव दृश्यते । श्रीमद्भागवते समस्तपदानामत्यधिकः प्रयोगः कृतो दृश्यते । तत्र केषुचित् स्थलेषु तु पूर्णाः पङ्क्तय एव समस्तपदमयाः सन्ति । पञ्चमस्कन्धादौ गद्यात्मकस्थले क्वचिदष्टादशपदानां दीर्घसमासोऽपि कृतो दृश्यते । श्रीमद्भागवते हि समस्तपदानां प्रयोगः सौन्दर्यमयः, चामत्कारिकः, कलात्मकः, तुलनात्मकरूपेण जटिलतायुक्तश्चास्ति । पूर्वमीमांसासूत्रेषु आपस्तम्बधर्मसूत्रेषु च सरलप्रकृतिकसमस्तपदानां प्रयोगो दृश्यते । पाणिनीयव्याकरणसूत्रेषु गौतमीयन्यायसूत्रेषु च समासस्यात्यधिकप्रयोगः कृतः प्राप्यते । सूत्रवाङ्मयेषु पाणिनीयसूत्राणि गौतमीयसूत्राणि च समासप्रयोगदृष्ट्याऽग्रस्थानं लभन्ते । तत्रापि महर्षिगौतमस्य दीर्घसमासप्रियत्वं दृश्यते । वृत्तिभाष्यग्रन्थेषु मध्ये भावबोधिनीनामकवृत्तिग्रन्थे लघ्वाकाराणां सरलसमस्तपदानां प्रयोगो दृश्यते । श्रीशंकराचार्यविरचितब्रह्मसूत्रभाष्यभाषा लघुमध्यमाकारसमासबहुला दृश्यते । श्रीरामानुजाचार्यविरचितश्रीभाष्यस्थभाषा समासबहुला, शांकरभाष्यतुलनया दीर्घाकारसमासयुता च दृश्यते । व्याकरणमहाभाष्ये लघ्वाकारयुतानि समस्तपदानि प्रयुक्तानि । संस्कृतवाङ्मयस्य साहित्यिकरचनासु समासप्रयोगस्थाध्ययनेन तत्र यथोत्तरं दीर्घसमासप्रयोगाधिक्यं दृश्यते । कालिदासममये लघ्वाकारसमासस्य प्रयोगः कृतः

प्राप्यते चेत् सप्तमशताब्दीकालिकरचनासु दीर्घसमासयुतरचनाः रचिता दृश्यन्ते । तत्रापि बाण-दण्डिनोर्गद्यसाहित्ये त्वतिदीर्घसमासप्रयोगः प्राप्यते । सप्तमशताब्द्यामागत्य समासबहुलसाहित्यस्य विकासो जातो दृश्यते । एकादशशताब्दीयेन श्रीरामानुजाचार्येण गीताभाष्ये कुत्रचिद्बहुदीर्घसमासः कृतो दृश्यते । दीर्घसमासप्रयोगदृष्ट्या श्रीरामानुजाचार्यविरचितगीताभाष्यं ह्येतत्सर्वेक्षणविषयभूतान् सर्वानपि ग्रन्थानतिशेते ।

इत्थञ्चानेनाध्ययनेन- संस्कृतवाङ्मये ऋग्वेदकालादेव प्रचलिता समासप्रक्रिया यथोत्तरं विदुषां विद्वत्ताप्रकाशिकात्वेन, भाषिककौशलप्रदर्शनसाधनत्वेन, भावगाम्भीर्यप्रतिपादिकात्वेन च बहुप्रयोगविषयताङ्गता प्राप्यते, समासप्रयोगदृष्ट्या संस्कृतवाङ्मयं समृद्धतमं दृश्यते, समासश्च संस्कृतवाङ्मयस्यासाधारणं मौलिकञ्च वैशिष्ट्यमस्तीति निष्कृष्यते ।

## कृतज्ञताज्ञापनम्

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च परामर्शं प्रदाय महदुपकारं कृतवद्भ्यो विज्ञगुरुजनेभ्यः, अन्येभ्यः सहयोगिभ्यश्च सश्रद्धं सधन्यवादञ्च कृतज्ञतां व्यनज्मि ।

## सन्दर्भग्रन्थसूची

अग्निपुराणम् – विकिस्रोतः ।

अथर्ववेद ( डा. गंगा सहाय शर्माद्वारा सम्पादित ), नई दिल्ली : संस्कृत साहित्य प्रकाशन, ई. २०१५ ।

अभिज्ञानशाकुन्तलम् , महाकविकालिदासप्रणीतम् , सम्पा.- राजदेव मिश्र, शुचिता राय, फैजावाद : घनश्याम एण्ड सन्स , ई २००० ।

आचार्यः वरदराजः, मध्यसिद्धान्तकौमुदी , वाराणसी : चौखम्बा अमरभारती प्रकाशन , २०४७ ।

आपस्तम्बधर्मसूत्रम् , (संस्क. २ ), डा. उमेशचन्द्रपाण्डेयविरचितया हिन्दीव्याख्यया समेतम् , वाराणसी : चौखम्बा संस्कृतम सीरीज आफिस, वि. सं. २०२६ ।

ईशादि नौ उपनिषद् (संस्कः-१४), गोरखपुर : गीताप्रेस, गोविन्दभवन कार्यालय, २०५१ ।

उपाध्याय, बलदेव और चौबे, व्रजबिहारी, संस्कृत वाङ्मय का बृहद् इतिहास , प्रथम वेदखण्ड, लखनऊ : उत्तर प्रदेश संस्कृत संस्थान , वि सं २०५२ ।

ऋग्वेदसंहिता, श्रीमत्सायणाचार्यविरचितभाष्यसमेता, प्रथममण्डलात्मकः प्रथमो भागः, पूना-२, भारतम् : वैदिक-संशोधन-मण्डलम्, तिलक-स्मारक- मन्दिरम्, १९३३ ।

ऐतरेयारण्यकम, श्रीमत्सायणाचार्यविरचितभाष्यसमेतम्, आनन्दाश्रममुद्रणालयः, पुण्याख्यपत्तनम् : हरिनारायण आप्टे, ई. १८९८ ।

किरातार्जुनीयमहाकाव्यम, भारविकृतम् :
https://sanskritdocuments.org/doc_z_misc_major_works/kirAtArjunIyam.html

कुमारः, मुनीषः, 'अर्जुनरावणीयम्' महाकाव्यस्य षष्ठात् दशमसर्गपर्यन्तं व्याकरणशास्त्रीयं भाषावैज्ञानिकञ्च समीक्षात्मकमध्ययनम्, विद्यावारिधिशोधप्रबन्धः, व्याकरणविभागः, राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः) वेदव्यासपरिसरः, बलाहरः, काङ्गडा (हिमाचल प्रदेशः), २०१८।

के.एस्., बिन्ध्या, उत्तररामचरितस्य व्याकरणम्, विद्यावारिधिशोधप्रबन्धः, संस्कृतव्याकरणविभागः श्रीशङ्कराचार्य-संस्कृतसर्वकलाशाला, कालटी, केरलम्, २०१८।

कौण्डभट्टः, वैयाकरणभूषणसारः, दर्पण-सुबोधिनीसहितः, वाराणसी : चौखम्बा सुरभारती प्रकाशन, १९९९।

गैरोला, वाचस्पति, संस्कृत साहित्य का इतिहास, वाराणसी : चौखम्बा विद्याभवन, वि. सं. २०१७।

त्रिपाठी, विजयप्रसादः, समासवृत्तिविमर्शः, वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, २०४७।

दण्डी, दशकुमारचरितम्, मुम्बई : शारदा-क्रीडनमुद्रायन्त्रालयः , शकाब्दाः १८२२।

दीक्षितः, भट्टोजिः, वैयाकरणसिद्धान्तकौमुदी, (मूलमात्रम्, पु.मु.सं.), वाराणसी : चौखम्बा विद्याभवन, २००८।

देवी, शकुन्तला, संस्कृत समासों का ऐतिहासिक एवं भाषावैज्ञानिक अध्ययन ( अप्रकाशितः शोधप्रबन्धः), रोहतक : महर्षि–दयानन्द–विश्वविद्यालयः, ई १९९३।

न्यायदर्शनम्, गौतममुनिप्रणीतम्, वाराणसी : चौखम्बा संस्कृत सीरीज , १९२०।

पञ्चतन्त्रम् ( संस्क- ३ ), विष्णुशर्मप्रणीतम् , काशी : भार्गव पुस्तकालयः, वि. सं .१९९७।

पतञ्जलि, व्याकरणमहाभाष्य, दिल्ली : मोतीलाल बनारसीदास , ई. १९९५।

पतञ्जलिः, व्याकरणमहाभाष्यम्, द्वितीयो भागः, गुरुकुल झज्जर (रोहतकः) : हरयाणा साहित्य संस्थान, वै. २०२०।

पाणिनीयसूत्रपाठः (अष्टाध्यायी ) (२०४७), हरिवंशकुमारपाण्डेयः (सम्पा), वाराणसी : भारतीय विद्या संस्थान ।

पौडेलः, हरिलालः(२०७४), संस्कृतरचनाप्रकाशोद्धृतपञ्चतन्त्रामुखस्थसमस्तशब्दाध्ययनम्, मेधा १, १८९-२०४।

पौडेलः, हरिलालः(२०७८), श्रीरामानुजीयगीताभाष्यप्रथमाध्यायस्थकतिपयजटिलसमस्तशब्दानामध्ययनम्, शोध ९/१, २०६-२१३।

बाणभट्टः, कादम्बरी, वाराणसी : चौखम्बा संस्कृत संस्थान , वै. २०३८।

पूर्वगीमांसासूत्रवृत्तिः 'भावबोधिनी', विद्याशंकरभारतीप्रणीता, कोल्हापुर भारत : श्री स्वामी जगद्गुरु शंकराचार्य पीठ, करवीर, ई १९५१।

महाभारत, चतुर्थ खण्ड, कर्णपर्व, (पु.मु. १५), गोरखपुर : गीताप्रेस २०७२।

महाभारत, प्रथम खण्ड, आदिपर्व और सभापर्व, ( पु.मु. १७), गोरखपुर : गीताप्रेस, २०७२।

महाभारत, षष्ठ खण्ड, अनुशासनपर्व, (१५ वाँ पुनर्मुद्रण ), गोरखपुर : गीताप्रेस, वि.सं. २०७२।

मिश्रः, रामचन्द्रः, संस्कृतसाहित्येतिहासः, वाराणसी : चौखन्बा विद्याभवनम्, वै. २०१७।

मीमांसक, युधिष्ठिर, संस्कृत व्याकरण-शास्त्र का इतिहास, प्रथम भाग, सोनीपत (हरयाणा ) : युधिष्ठिर मीमांसक, २०४१।

रघुवंशमहाकाव्यम् , महाकविकालिदासप्रणीतम्, बम्बई : खेमराज श्रीकृष्ण दास, श्रीवेङ्कटेश्वर प्रेस, वै.सं.१९६४।

रामानुजाचार्यः, शारीरकमीमांसाश्रीभाष्यम्, श्रीमद्वेदान्ताचार्य विरचित-अधिकरणसारावली सहितम्, वृन्दावन मथुरा : वेदान्ताचार्य पण्डित धनीराम शास्त्री , ज्ञानगुदडी, वै. १९९४।

गोयन्का, हरिकृष्णदास (व्या) (२०५०) , श्रीमद्भगवद्गीता, श्रीरामानुजभाष्य हिन्दी अनुवादसहित, गोरखपुर : गीताप्रेस।

वाक्यपदीयम् (ब्रह्मकाण्डम्), भर्तृहरिविरचितम्, संस्कृत नेपाली हरिबोधिनी व्याख्या सहितम्, दाङ : प्रा. स्थानेश्वर गौतम, २०७५।

विट्ठलाचार्यः (टी.) प्रक्रियाकौमुदी (प्रसादटीकायुता), प्रथमो भागः : https://archive.org/details/prakriyakaumudi/mode/1up

वेदान्तदर्शन ( ब्रहमसूत्र ) वेदव्यासप्रणीत (संस्क- २१), गोरखपुर : गीताप्रेस, २०६०।

शतपथ-ब्राह्मणम्, सायणाचार्यविरचित-वेदार्थप्रकाशाख्य- भाष्यसमेतम्, प्रथमो भागः, कल्याण-बम्बई : गंगाविष्णु श्रीकृष्ण दास, सन् १९४०।

शर्मा, शशि बाला, भट्टिट्ट-काव्य का व्याकरण के संदर्भ में एक आलोचनात्मक एवं भाषिक-अध्ययन' अप्रकाशितः विद्यावारिधिशोधप्रबन्धः, संस्कृत, पाली एवं प्राकृत विभाग, महर्षि दयानन्द विश्वविद्यालय, रोहतक , १९८८।

शाङ्खायनारण्यकम् (सांख्यान आरण्यक):
https://archive.org/details/20200315_20200315_0845/mode/1up

शास्त्री, द्वारिकाप्रसादः, शुक्लः, कालिकाप्रसादः, (सम्पा.), काशिकावृत्तिः (न्यासपदमञ्जरीसहिता, द्वितीयो भागः), वाराणसी : प्राच्यभारतीप्रकाशनम् , ई.१९६५।

शिशुपालवधम्, माघकविनिर्मितम्, बनारस : चौखम्बा संस्कृत सीरिज आफिस, ई १९८५।

शुक्लयजुर्वेदीयमन्त्रसंहिता, सम्पा. - पं अशोक कुमार गौड, प्रका- रूपेश ठाकुर प्रसाद प्रकाशन, कचौडीगली वाराणसी, ई. २००८।

श्रीमद्भागवतमहापुराणम् (मूलमात्रम्) ( संस्क. १४ ), गोरखपुर : गोविन्द भवन कार्यालय, गीताप्रेस , २०५३।

श्रीमद्वाल्मीकीय रामायण, प्रथम भाग (संस्क.११) , गोरखपुर : गीताप्रेस, २०४९।

श्रीमद्वाल्मीकीय रामायण, द्वितीय भाग (संस्क.११) , गोरखपुर : गीताप्रेस, २०४९।

श्रीविष्णुपुराण ( संस्क. १५ ), गोरखपुर : गोविन्द भवन कार्यालय, गीताप्रेस, २०५१।

सरस्वती, स्वामी सत्यानन्द ( व्या . ), ब्रह्मसूत्रशाङ्करभाष्यम् (भाषानुवाद-सत्यानन्दी-दीपिका-समलङ्कृतम् ), दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान , ई. २०१४।

साम-वेद, सम्पा. श्रीराम शर्मा आचार्य , गायत्री तपोभूमि मथुरा : गायत्री प्रकाशन , ई १९६०।